यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यौ यावत्साध्यतावच्छेदकतावर्तमानौ यौ साध्यतावच्छेदकतात्वधर्मौ ताभ्यामेवाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना या प्रतियोगिता सैव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । तत्र यदि महानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा सा साध्यतावच्छेदकतात्वोभयभिन्नेन यावत्साध्यतावच्छेदकतासु अवर्तमानमहानसीयत्ववृत्तितावैशिष्ट्येनावच्छिन्ना भवेदिति महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव ग्राह्या, तादृशप्रतियोगितायाः साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वेन साध्यतावच्छेदकतात्वयोः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यत्वेन च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः ग्रहणं शक्यमेव । तादृशप्रतियोगिताश्रयमहानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तिसम्बन्धेन वर्तमानतया तादृशमहानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवतीति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेणाऽग्राह्यत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नैव भवेत् ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ

●

साध्यताअवच्छेदकतामां रहेनार तद्व्यक्तित्व महानसीयत्ववृत्ति साध्यताअवच्छेदकतामां नथी रहेतुं. अने महानसीयत्ववृत्ति साध्यताअवच्छेदकतामां रहेनार तद्व्यक्तित्व वह्नित्ववृत्ति साध्यताअवच्छेदकतामां नथी रहेतुं.

मात्र साध्यताअवच्छेदकतात्व ज महानसीयत्ववृत्ति साध्यताअवच्छेदकतामां पण रहे छे अने वह्नित्ववृत्तिसाध्यताअवच्छेदकतामां पण रहे छे. माटे, साध्यताअवच्छेदकतात्व सिवायना महानसीयत्ववृत्तिसाध्यताअवच्छेदकतानिष्ठ तद्व्यक्तित्व, वह्नित्ववृत्तिसाध्यताअवच्छेदकतानिष्ठ तद्व्यक्तित्व... वगेरे कोई पण धर्मोथी अनवच्छिन्न जे प्रतियोगिता होय ते ज लई शकाशे.

-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वसत्त्वेऽपि महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं न सम्भवति इति महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां नैव भवेत् । ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव भवेत् ।

⊠ वह्नित्ववृत्ति साध्यताअवच्छेदकता लई नहीं शकाय ⊠

वह्नित्ववृत्ति साध्यताअवच्छेदकतामां रहेनारी प्रतियोगिता तो वह्नित्ववृत्ति साध्यताअवच्छेदकतामां रहेनार तद्व्यक्तित्वथी अवच्छिन्न छे. मतलब के साध्यताअवच्छेदकताअवृत्ति धर्मथी अवच्छिन्न छे, अनवच्छिन्न नहीं. माटे, साध्यताअवच्छेदकताअवृत्तिधर्मअनवच्छिन्न तरीके वह्नित्ववृत्ति साध्यताअवच्छेदकतामां रहेनारी प्रतियोगिता लई नहीं शकाय.

महानसीयत्व-वह्नित्वउभयमां रहेनारी जे साध्यताअवच्छेदकता तेमां रहेली प्रतियोगिता लईए तो ते प्रतियोगिता मात्र साध्यताअवच्छेदकतात्वथी ज अवच्छिन्न छे. साध्यताअवच्छेदकतात्व सिवायना तमाम धर्मोथी अनवच्छिन्न ज छे. माटे, साध्यताअवच्छेदकताअवृत्तिधर्मअनवच्छिन्नप्रतियोगिता तरीके महानसीयत्व-वह्नित्ववृत्तिसाध्यताअवच्छेदकतानिष्ठ प्रतियोगिता लेवी पडे. आ प्रतियोगितानुं अधिकरण जे महानसीयत्व-वह्नित्वउभयवृत्तिसाध्यताअवच्छेदकता ते महानसीयत्व अने वह्नित्व - बन्नेमां रहेती होवाथी साध्यताअवच्छेदकताअवृत्तिधर्मअनवच्छिन्नतादृशप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकरूप महानसीयत्व-वह्नित्वगतद्वित्व ज थशे.

आ रीते, साध्यताअवच्छेदकताअवृत्तिधर्मअनवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्वविशिष्ट तरीके महानसीयत्व-वह्नित्वगतद्वित्व ज प्राप्त थशे, वह्नित्वगतएकत्व नहीं. वह्निअभावीयप्रतियोगितामां वह्नित्वगतएकत्वअवच्छिन्नअनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसंबंधअवच्छिन्न-प्रतियोगितानिष्ठ-अवच्छेदकताभिन्नअवच्छे-

किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्न-(प्रतियोगिता)अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्याऽपि महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽपि च सत्त्वात् तादृशमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां स्यादेवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः धर्तुं शक्यते। तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिः।

●

દકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણપ્રતિયોગિતાઅવચ્છેદકતાથી જ નિરૂપિતત્વ રહેલું છે. મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્ન-અનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિ-કરણથી નિરૂપિતત્વ રહેલું નથી - આ વાત પૂર્વે જણાવી જ દીધેલ છે. માટે, કેવી રીતે આ વાત શક્ય બને ? - તે અંગે વિસ્તૃત છણાવટ અમે કરતા નથી.

❄ વહ્ન્યભાવ અગ્રાહ્ય બનતા અવ્યાપ્તિ દૂર ❄

ટૂંકમાં, વહ્નિઅભાવીયપ્રતિયોગિતામાં સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વવિશિષ્ટમહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વ-અવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણથી નિરૂપિતત્વ રહેલું ન હોવાથી તાદશપ્રતિયોગિતાનિરૂપક વહ્નિઅભાવ લઈ નહીં શકાય. મહાનસીયવહ્નિઅભાવ જ લઈ શકાશે. કારણ કે મહાનસીયવહ્નિઅભાવીય-પ્રતિયોગિતા જ સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-

तथा च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्याऽपि प्रवेशः नैव कार्यः, निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितवच्छेदकताभिन्न-(साध्यता)अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्यापि प्रवेशः नैव कार्यः, साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नत्वस्यापि प्रवेशः नैव कार्यः, साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्यापि प्रवेशः नैव कार्यः, किन्तु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्यैव प्रतियोगिता-विशेषणविधया प्रवेशः कार्यः इति स्थितम् ।

यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितायाः प्रवेशे कृतेऽपि पर्याप्त्यनिवेशेन केवलं 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितावच्छेदकरूपा-ऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रया-वच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणा-ऽभ्युपगमे पुनरपि 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रैव वह्न्यभावमादायाऽव्याप्तिः स्यात्, यतः पूर्वं यथा प्रदर्शितं तथा प्रकृते साध्यतावच्छेदकता पर्याप्तिसम्बन्धेनैव महानसीयत्व-वह्नित्वोभयस्मिन् भवेत्, स्वरूपसम्बन्धेन तु केवलमहानसीयत्वेऽपि भवेत्, केवलवह्नित्वेऽपि भवेत्, तथा च साध्यतावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगिता वह्नित्वेऽपि सम्भवति, केवलमहानसीयत्वेऽपि च । साध्यतावच्छेदकतानिष्ठा इयं प्रतियोगिता साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचित्, साध्यत्वावच्छेदकतात्वधर्मौ तु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यौ इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठ-

●

અનુયોગિતાઅવચ્છેદકત્વવિશિષ્ટમહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપક-પર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વ-નિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણનિરૂપિત છે. આ મહાન-સીયવહ્નિઅભાવનું અધિકરણ તજ્જ્ઞાનભિન્નજ્ઞાન. તજ્જ્ઞાનત્વ હેતુ ત્યાં અવૃત્તિ હોવાથી લક્ષણસમન્વય થઈ જશે, અવ્યાપ્તિને કોઈ અવકાશ રહેશે નહીં. આ રીતે આપણે જે જે વસ્તુ પરંપરાસંબંધમાં રાખી હતી તે બધીને સળંગ વાક્યમાં સ્થાન આપી દીધું.

प्रतियोगिता धर्तुं शक्यते ।

तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगितायाः केवलवह्नित्वेऽपि सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगिताऽपि वह्नित्वे स्यादिति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितावच्छेदकं रूपं वह्नित्व-गतैकत्वं स्यात्, तथा च पूर्वोक्तरीत्या वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितत्वस्य वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितावच्छेदकवह्नित्व-गतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियो-गितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तित्वाभावाल्लक्षणाऽसमन्वयः अव्याप्तिश्च । पर्याप्तिसम्बन्धेनैव साध्यतावच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन् वर्तते, स्वरूपसम्बन्धेन तु केवलमहानसीयत्वेऽपि वर्तते, केवलवह्नित्वेऽपि - एतदेव एतदव्याप्तिमूलमिति ।

यदि पर्याप्तिः निवेश्यते तदा यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः - इत्येवं लक्षणं भवति, एतल्लक्षणानुसारेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता-निरूपिका पर्याप्तिसम्बन्धावच्छिन्नानुयोगिता एव ग्राह्या, न तु स्वरूपसम्बन्धावच्छिन्ना। प्रकृते 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र साध्यतावच्छेदकता पर्याप्तिसम्बन्धेन महानसीयत्वे वह्नित्वे चैव भवेत्, तथा च यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिसम्बन्धावच्छिन्ना अनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्, अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । ततश्च पूर्वोक्तरीत्या तादृशयत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-

वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतायाः अग्राह्यत्वाद् महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः एव ग्राह्यत्वाच्च महानसीयवह्न्यभावः एव धर्तुं शक्यते, वह्न्यभावः नैव । महानसीयवह्न्यभावाधिकरणविधया यत्प्राप्यते तत्र तज्ज्ञानत्वहेतोरवृत्तितया नैव अव्याप्तिरिति पर्याप्तिः अवश्यन्तया निवेशनीया ।

ननु अस्तु पर्याप्तिनिवेशस्याऽऽवश्यकत्वं तथापि अनुयोगितावच्छेदकत्वपर्यन्तमनुधावनमनुचितमेव, यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणाङ्गीकारेणाऽपि इष्टसिद्धेः । लक्षणसमन्वयश्चैवम् - पर्वतो वह्निमान् धूमाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता प्राप्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता केवलवह्नित्वे एव वर्तते इति तादृशानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता केवलवह्नित्वे एव पर्याप्तिसम्बन्धेन वर्तमानावच्छेदकतादौ भवेत् ।

तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतादौ एव तादृशवह्नित्वनिष्ठानुयोगितानिरूपकपर्याप्तिप्रतियोगिता भवेत्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतादौ नैव, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वात्, न तु केवलवह्नित्वे । वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तु केवलप्रतियोगित्वेन अवच्छेदकतात्वेन चैवावच्छिन्ना, एतदतिरिक्तेन न केनापीति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां स्यादेव । तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता नैव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते, अतः वह्न्यभावः एव

धर्तुं शक्यते, वह्न्यभावाधिकरणे च धूमहेतोः वृत्तितया लक्षणसमन्वयात्कुतोऽव्याप्तिः ?

'अत्र महानसीयवह्निः' इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्न्यभावमादाय नाऽव्याप्तिः, यतः पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति-धर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता च महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्, महानसीयत्व-वह्नित्वोभयस्मिन् या अनुयोगिता भवेत्, तन्निरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तिसम्बन्धेन वर्तमानावच्छेदकतादौ एव भवेत्, नान्यत्र कुत्रचित्, यतः महानसीयत्व-वह्नित्वोभयवृत्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता = महानसीयत्व-वह्नि-त्वोभयनिष्ठाधारतानिरूपकपर्याप्तिसम्बन्धावच्छिन्नाधेयता, अर्थाद् महानसीयत्व-वह्नित्वो-भयं पर्याप्तिसम्बन्धेन वर्तमानस्य कस्यचिदाधेयस्याधारं भवतीति निश्चीयते, तथा च महानसीयत्व-वह्नित्वोभयनिष्ठानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्ति-सम्बन्धेन वर्तमानावच्छेदकतादौ एव भवेदिति स्थितम् ।

य शो ल ता

अतः तादृशमहानसीयत्व-वह्नित्वोभयवृत्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, न वह्न्यभावीयप्रतियोगितावच्छेदकतायाम्, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः केवलवह्नित्वे पर्याप्तत्वात्, न महानसीयत्व-वह्नित्वो-भयस्मिन्निति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तादृशमहानसीयत्व -वह्नित्वोभयवृत्त्यनुयोगितानिरूपकपर्याप्तीया भवेदेव, इयमेव प्रतियोगिता केवलप्रतियोगित्वेन अवच्छेदकतात्वेन चैवावच्छिन्नत्वात्, तदतिरिक्तेन अनवच्छिन्नत्वाच्च निरूपितत्वसम्बन्धावच्छिन्न -किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपिता स्यादेव । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव लभ्यते, वह्न्यभावीयप्रतियोगितावच्छेदकता नैव । तादृशमहानसीयवह्न्यभावाधिकरणे तज्ज्ञानत्वहेतोः वृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ? एवमनुयोगितावच्छेदकत्वप्रवेशमन्तराऽपि उपपत्तौ किमर्थमनुयोगितावच्छेदकत्वपर्यन्तमनुधावनम् ? ऋजुणा सिध्यतोऽर्थस्य वक्रेण साधना-

ऽयोगादिति न्याया***दिति चेत् ?***

न, अनभिज्ञानमूलत्वादेतद्विलासस्य । किं भवान् न्यायसिद्धान्तं जानाति ? भूतले घट -पटोभयसत्त्वे संयोगसम्बन्धावच्छिन्न-घटनिष्ठ-प्रतियोगितानिरूपिता संयोगसम्बन्धावच्छिन्न-पटनिष्ठ-प्रतियोगितानिरूपिता च भूतलनिष्ठा अनुयोगिता एका एव भवति ? भिन्ना भिन्ना वा ? यदि एका तदा घटस्यान्यत्र नयने घटाऽसत्त्वदशायां पटाऽसत्त्वप्रसङ्गः, घटनिरूपिताऽधारतायाः भूतलतोऽपगमात् तदभिन्नभूतलनिष्ठपटीयाधारताया अपगमध्रौव्यात्, भूतले पटीयाधारताऽभावे न हि पटः भूतले स्यात्, भूतले तदाधारताऽभावेऽपि पटाभ्युपगमे सर्वत्र पटवृत्तित्वप्रसङ्गः, सर्वेषु तदाधारत्वाभावस्याऽविशेषात् । न हि सर्वत्र पटाधारत्वाभावे समानेऽपि एकत्र तद्वृत्तित्वस्य अन्यत्र तदभावस्याङ्गीकारे यदृच्छाभिन्नं किमपि प्रमाणम् ! न हि भूतले घटापगमे पटस्याप्यपगमः केनाऽपि अङ्गीक्रियते । ***यदि च*** घटाऽसत्त्वदशायामपि घटानुयोगितायाः भूतले सत्त्वात् तदभिन्नपटानुयोगितायाः अपि सत्त्वसिद्ध्या न घटापगमे पटापगमाऽऽपत्तिः ***इत्युच्यते; तदापि न निस्तारः,*** घटाऽसत्त्वदशायामपि घटानुयोगितायाः भूतले सत्त्वाऽभ्युपगमे घटसत्त्वं प्रति घटानुयोगिता नियामिका न स्यात्, अर्थाद् यत्र घटानुयोगिता भवेत् तत्र घटः स्यादेव, यत्र घटानुयोगिता न स्यात् तत्र घटोऽपि न स्यादित्येवं घटीयानुयोगिता घटवृत्तितां प्रति नियामिका नैव भवेत्, ततश्च घटानुयोगिताऽसत्त्वेऽपि घटवृत्तौ बाधकाभावात् सर्वत्र घटवृत्तिताप्रसङ्गः दुर्निवारः एव। ततश्च भूतलनिष्ठायाः घटनिष्ठप्रतियोगितानिरूपकानुयोगितायाः पटनिष्ठ-प्रतियोगितानिरूपकानुयोगितायाश्चाऽभेदः नैव सहृदयहृदये प्रतीयते ।

तथा च तादृशानुयोगिताद्वितयस्य भेदः एवाऽभ्युपगन्तव्यः, ततश्च पटनिष्ठप्रतियोगितानिरूपकानुयोगिता भिन्ना, घटनिष्ठप्रतियोगितानिरूपकानुयोगिता भिन्ना, पटनिष्ठप्रतियोगितानिरूपकानुयोगितानिरूपकप्रतियोगिता पटे एव भवेत्, न घटे, घटनिष्ठप्रतियोगितानिरूपकानुयोगितानिरूपकप्रतियोगिता घटे एव भवेत्, न पटे, यतः यदाधारताऽपेक्षया घटे आधेयत्वं सम्भवति न हि तदपेक्षया एव पटेऽपि आधेयत्वं भवतीति अस्य सुप्रतीतत्वेन तादृशानुयोगिताद्वितयस्याभेद-निराकरणात् । ततश्च एकस्मिन् वह्नित्वे यदा साध्यतावच्छेदकताऽपि वर्तते, वह्न्यभावीय-प्रतियोगितावच्छेदकताऽपि वर्तते तदा वह्नित्वनिष्ठा या साध्यतावच्छेदकतानिष्ठप्रतियोगिता-निरूपकानुयोगिता या च वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगिता तयोः द्वयोः अनुयोगितयोः भेदः एवाऽभ्युपगन्तव्यः, न तु अभेदः, अतः साध्यतावच्छेदकतानिष्ठ-

प्रतियोगितानिरूपकानुयोगितानिरूपकप्रतियोगिता साध्यतावच्छेदकतायामेव भवेत्, न वह्नित्वे पर्याप्तायामपि वह्न्यभावीयप्रतियोगितावच्छेदकतायाम्, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः अपि वह्नित्वे वर्तमानतया तदनुयोगितायाः वह्नित्वे सत्त्वेऽपि तादृशानुयोगितायाः साध्यतावच्छेदकतानिरूपिताऽनुयोगितातो भिन्नतया वह्न्यभावीयप्रतियोगितावच्छेदकतानिरूपिताऽनुयोगितानिरूपकप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतायां सम्भवेऽपि साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगितानिरूपकप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतायां सर्वथा असम्भवात्।

अत एव वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकवह्नित्वनिष्ठानुयोगितानिरूपकप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, साध्यतावच्छेदकतायां नैव। तथा च वह्नित्वनिष्ठानुयोगितानिरूपकप्रतियोगितायाः वह्नित्ववृत्त्यवच्छेदकतादौ सत्त्वेऽपि यदि वह्नित्वनिष्ठानुयोगिता साध्यतावच्छेदकतानिष्ठप्रतियोगितादिना निरूपिता भवेत्, तदा तादृशवह्नित्वनिष्ठानुयोगितानिरूपकप्रतियोगिता साध्यतावच्छेदकतादौ एव भवेत्, न वह्न्यभावीयप्रतियोगितावच्छेदकतादौ । अत एव वह्नित्वनिष्ठानुयोगितानिरूपकप्रतियोगितायाः साध्यतावच्छेदकतायामपि, वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि च सत्त्वेऽपि वह्नित्वनिष्ठयदनुयोगितानिरूपकप्रतियोगिता साध्यतावच्छेदकतायां वर्तते न हि वह्नित्वनिष्ठतदनुयोगितानिरूपकप्रतियोगिता एव वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, किन्तु भिन्ना एव ।

अतः भवता प्रदर्शितलक्षणाऽनुसारेणाऽसम्भवः निवारयितुमशक्यः एव भवेत्, तथा हि- पर्वतो वह्निमान् धूमाद् - इत्यत्र अव्याप्तिनिराकरणार्थं महानसीयवह्न्यभावः लक्षणघटकः न स्यात्तदावश्यकम्, तथैव लक्षणसमन्वयार्थं वह्न्यभावो लक्षणघटकः भवेत् तदप्यावश्यकमेव। किन्तु वह्न्यभावः प्रकृतलक्षणानुसारेण लक्षणघटको नैव भवति, न केवलं वह्न्यभावः, किन्तु कोऽप्यभावः प्रकृतलक्षणानुसारेण लक्षणघटको नैव भवेत्, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता वह्नित्वे भवति इति निश्चितम्, तत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते इत्यपि निश्चितम् । ततश्च प्रकृतलक्षणानुसारेण अभिप्रेताऽभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यदि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीया भवेत्, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-

भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता च भवेत् तदैवाऽभिप्रेताऽभावः धर्तुं शक्यः भवेत्, तत्र वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता पूर्वोक्तरीत्या निरूपितत्वसम्बन्धेन प्रतियोगितया अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वाद् निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपिता तु अस्त्येव, किन्तु तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायां तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितानिरूपकपर्याप्तीयत्वं कथमपि नैव सम्भवति, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मा-नवच्छिन्नप्रतियोगितावधिया ग्राह्यवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकानुयोगिता-निरूपकपर्याप्तीयप्रतियोगितायाः केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव सत्त्वात् । न हि तादृशानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्वे पर्याप्तिसम्बन्धेन वर्तमानावच्छेदकतादौ सर्वत्र भवेत्, किन्तु तादृशाऽनुयोगितायाः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगित्वेन = प्रकृते वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगित्वेन निरूपितत्वात् । (यद्यपि तादृशानुयोगितायाः निरूपकतया निर्देशः क्रियते, तथापि तन्निरूपितत्वमपि भवत्येवेति उभयथाऽपि प्रयोगो भवति, नास्ति तत्र व्यामोहनिमित्तत्वमिति गुरुचरणप्रसादप्राप्तविद्यैः विद्वद्भिः विभावनीयम्) तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-प्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत्, नैव वह्नित्वे पर्याप्तायामपि वह्न्यभा-वीयप्रतियोगितावच्छेदकतायाम् ।

य शो ल ता

तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत्, वह्नित्वनिष्ठसाध्यताव-च्छेदकतावृत्तिप्रतियोगितायाश्च तद्व्यक्तित्वेनावच्छिन्नत्वात् तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्ति-प्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता नैव भवेत्, किन्तु निरूपितत्वसम्बन्धा-वच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-तद्व्यक्तित्वनिष्ठप्रतियोगितावच्छेदकतया निरूपिता एव । तथा च प्रकृते यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-

भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता एवाऽप्रसिद्धा इति लक्षणाऽप्रसिद्धिरेतत्स्थले दुर्वारा एवेति लक्षणाऽसमन्वयोऽपि ध्रुवः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावोऽपि महानसीयवह्न्यभावोऽपि च धर्तुं नैव शक्यौ भवेताम्, यतः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्व-वह्नित्वोभय-वृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, तादृशमहानसीयत्व-वह्नित्वोभयवृत्ति-साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन् एव भवेत् । ***यद्यपि*** महानसीयत्व-वह्नित्वोभयवृत्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व -वह्नित्वोभयस्मिन् पर्याप्तिसम्बन्धेन वर्तमानावच्छेदकतादौ सर्वत्र भवेत् ***तथापि*** महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकप्रतियोगिता तु महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतायामेव भवेत्, महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतादौ नैव भवेत् । तथा च यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतायामेव भवति ।

महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता निरूपितत्वसम्बन्धेन साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तदतिरिक्तेन न केनापीति महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यता-वच्छेदकतानिष्ठप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्ना-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि स्यादेव । अतः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण महानसीयत्व-वह्नित्ववृत्तिसाध्यतावच्छेदकतावृत्तिप्रतियोगिता एव प्राप्यते, वह्न्यभावीयप्रतियोगितावच्छेद-कतावृत्तिप्रतियोगिता तु नैव प्राप्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगि-ताऽपि नैव प्राप्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानव-

य शो ल ता

च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीयत्वाऽभावात् ।

यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयाऽवच्छेदकताविधया महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकता एव प्राप्यते, तादृशसाध्यतावच्छेदकतानिरूपित-प्रतियोगितानिरूपकः अभावः [1] विश्वेऽपि विश्वे नैव प्राप्यते, यतः प्रतियोगितावच्छेदकता एव प्रतियोगितायाः निरूपिका भवेत्, साध्यतावच्छेदकता कथं प्रतियोगितायाः निरूपिका भवेत् ? प्रतियोगितावच्छेदकता प्रतियोगितायाः = प्रतियोगितासम्बन्धिनी अस्तीति प्रतियोगितानिरूपिका प्रतियोगितावच्छेदकता कथयितुं शक्यते, किन्तु साध्यतावच्छेदकता साध्यतायाः = साध्यतासम्बन्धिनी अस्तीति साध्यतानिरूपिका साध्यतावच्छेदकता कथ्यते, प्रतियोगितानिरूपिका साध्यतावच्छेदकता इति तु स्वप्नेऽपि कल्पयितुं न शक्यते इति तादृशोऽभावः अप्रसिद्धः एव भवेत्, ततश्च लक्षणसमन्वयः असम्भवः इति असम्भवः सुसम्भवः ।

किञ्च, यदि महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतादौ अपि भवेदिति अभ्युपगमवादेन असत्कल्पनया वा अङ्गीक्रियते तदाऽपि 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः भवेदेव, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितावच्छेदकतानिरूपितप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयाऽवच्छेदकताविधया महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तसाध्यतावच्छेदकतावृत्तिप्रतियोगिता गृहीता, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्वेऽपि वर्तते, वह्नित्वेऽपि वर्तते, अर्थात् तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन् वर्तते, किन्तु सा न एका एवानुयोगिता, महानसीयत्वनिष्ठानुयोगिता भिन्ना, वह्नित्वनिष्ठानुयोगिता भिन्ना, यथा महानसीयत्वनिष्ठा साध्यतावच्छेदकता भिन्ना, वह्नित्व-निष्ठा साध्यतावच्छेदकता भिन्ना । तत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितारूपेण महानसीयत्वनिष्ठानुयोगिताऽपि धर्तुं शक्यते, वह्नित्वनिष्ठा-नुयोगिताऽपि धर्तुं शक्यते ।

य शो ल ता

१. निखिलेऽपि इत्यर्थः ।

यदि च उक्ताऽभ्युपगमानुसारेण साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतादौ सर्वत्र भवेत् तदा तादृशवह्नित्वनिष्ठानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्वे पर्याप्तावच्छेदकतादौ सर्वत्र भवेदिति वह्न्यभावीयप्रतियोगितावच्छेदकतायां तादृशवह्नित्वनिष्ठा-नुयोगितानिरूपकपर्याप्तीयप्रतियोगिता भवेदेव । तादृशवह्नित्वनिष्ठानुयोगितायाः पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितारूपेण ग्राह्यत्वात् तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता भवेदेव, इयञ्च वह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धेन प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेद-कताऽनिरूपितप्रतियोगितारूपेणाऽपि तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव ।

तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-निरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतायाः ग्राह्यत्वात् तादृशवह्न्यभावो धर्तुं शक्यते एव, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तित्वाभावाल्लक्षणाऽसमन्वयादव्याप्तिः भवेदेवति अनुयोगिताघटितमिदं लक्षणं दुरन्तम् इति स्पष्टं संवेद्यते ।

यदि अनुयोगितावच्छेदकत्वं निवेश्य पूर्वोक्तं 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मा-नवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः'- इति एवं लक्षणमङ्गीक्रियते तदा नोक्ताऽऽऽपत्तिः, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता यद्यपि केवलमहानसीयत्वेऽपि वर्तते, केवलवह्नित्वेऽपि, तथापि तादृशपर्याप्त्यनुयोगितावच्छेदकं

महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, न वह्नित्वगतैकत्वं महानसीयत्वगतैकत्वं वा, तयोः महानसीयत्वे वह्नित्वे वा एकस्मिन्नेव वर्तमानत्वेन, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमानत्वेन च तयोः न्यूनवृत्तित्वात् । तथा च तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

ततश्च पूर्वोक्तरीत्या महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयनिरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः एव प्राप्तेः वह्न्यभावीयप्रतियोगितावच्छेदकतायाः अप्राप्तेश्च महानसीयवह्न्यभावः एव धर्तुं शक्यते, वह्न्यभावः नैव धर्तुं शक्यते, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ?

किञ्च, पूर्वं साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतादौ नैव भवेदिति सर्वत्र लक्षणाऽसमन्वयाद् असम्भवः आपादितः सः अनुयोगितावच्छेदकत्वप्रवेशे असम्भवितः, यतः यथा पूर्वं दर्शितं तथा घटनिष्ठप्रतियोगितानिरूपिता भूतलनिष्ठानुयोगिता पटनिष्ठप्रतियोगितानिरूपिता भूतलनिष्ठानुयोगिता च भिन्ना भिन्ना एव तथापि घटनिष्ठप्रतियोगितानिरूपितभूतलनिष्ठानुयोगितायाः अवच्छेदकं यद् भूतलत्वं तदेव पटनिष्ठप्रतियोगितानिरूपितभूतलनिष्ठानुयोगितायाः अवच्छेदकम्, भूतलत्वस्य जातित्वेन ऐक्यात्, न हि घटनिष्ठप्रतियोगितानिरूपितानुयोगितावच्छेदकं यद् भूतलत्वं ततो भिन्नं भूतलत्वं पटनिष्ठप्रतियोगितानिरूपितानुयोगितायाः अवच्छेदकं भवति इति घटनिष्ठप्रतियोगितानिरूपितानुयोगितानिरूपकप्रतियोगिता पटे नैव भवति, किन्तु घटनिष्ठप्रतियोगितानिरूपिताऽनुयोगितावच्छेदकभूतलत्वावच्छिन्नानुयोगितानिरूपितप्रतियोगिता पटे भवत्येव, यतः पटनिष्ठप्रतियोगितानिरूपकानुयोगितायाः भूतलत्वाऽवच्छिन्नत्वेन घटनिष्ठप्रतियोगितानिरूपकानुयोगितायाः अपि तथात्वेन घटनिष्ठप्रतियोगितानिरूपकानुयोगितावच्छेदकभूतलत्वावच्छिन्ना पटनिष्ठप्रतियोगितानिरूपकानुयोगिता कथ्यते एव । एवं घटनिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अपि पटनिष्ठप्रतियोगितानिरूपकाऽनुयोगितावच्छेदकभूतलत्वावच्छिन्नत्वेन पटनिष्ठप्रतियोगितानिरूपकानुयोगितावच्छेदकभूतलत्वावच्छिन्नानुयोगितानिरूपकप्रतियोगिता घटे भवेदेव ।

य शो ल ता

एवं साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-प्रतियोगितायाः साध्यतावच्छेदकतायामेव सत्त्वेऽपि, अभावीयप्रतियोगितावच्छेदकतायामसत्त्वेऽपि साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः वह्नित्वनिष्ठायाः यद् वह्नित्वगतैकत्वमवच्छेदकं तदेव वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमपि, अनुयोगिताद्वितयावच्छेदकं वह्नित्वगतैकत्वमेकमेव, वह्नित्वस्यैकत्वेन तद्गतैकत्वस्याऽपि अभेदात् । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वेन वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अवच्छिन्नत्वेन साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव, एवं वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अवच्छिन्नत्वेन वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायां सम्भवतीति अधुना एवं लक्षणसमन्वयः भवेत् -

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन वह्नित्वे वर्तमानत्वेन तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधयाऽपि वह्नित्वगतैकत्वमेव प्राप्यते । वह्न्यभावीयप्रतियोगितावच्छेदकताया अपि वह्नित्वे एव पर्याप्तिसम्बन्धेन वर्तमानतया वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव भवति । एवं महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतायाः अपि वह्नित्वे एव पर्याप्तिसम्बन्धेन वर्तमानतया तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव, एतत्त्रितयानुयोगितावच्छेदकं वह्नित्वगतैकत्वन्तु एकमेव ।

ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि वर्तते। किन्तु तत्र वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नवह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपिता वर्तते। वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तु निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता एव वर्तते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकता एव गृह्यते, वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता नैव गृह्यते इति वह्न्यभावः एव धर्तुं शक्यते, महानसीयवह्न्यभावः नैव, वह्न्यभावाधिकरणे च जलह्रदादौ धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽसम्भववार्ताऽपि अनुयोगितावच्छेदकत्वप्रवेशाङ्गीकारे ?

य शो ल ता

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, तादृशमहानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, किन्तु महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तमानत्वेन महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं यद् महानसीयत्व-वह्नित्वगतद्वित्वं भवति, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः अपि पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तमानतया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं तदेव महानसीयत्व-वह्नित्वगतद्वित्वं भवति, तादृशानुयोगिताद्वितयावच्छेदकं महानसीयत्व-वह्नित्वगतद्वित्वमेकमेवेति महानसीयत्व-वह्नित्वोभयवृत्ति-

साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगत-द्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां सम्भवत्येव, वह्न्यभावीयप्रतियोगितावच्छेदकतायां तु तादृशमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता नैव सम्भवति, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नवर्तमानत्वात् ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः निरूपितत्वसम्बन्धेन प्रतियोगितया अवच्छेदकतात्वेन चैवाऽवच्छिन्नतया तादृशप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता भवेदेवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपितत्वसम्बन्धावच्छिन्नाश्रयावच्छेदकत

तज्ज्ञानत्वाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते। वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता स्वरूपसम्बन्धेन पर्याप्तिसम्बन्धेन च वह्नित्वे एव वर्तते इति वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणविधया वह्नित्वमेव प्राप्यते, न तु महानसीयत्व-वह्नित्वोभयम् । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन् वर्तते, यदि स्वरूपसम्बन्धेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अधिकरणं गवेष्यते तदा केवलं महानसीयत्वमपि प्राप्यते, केवलवह्नित्वमपि। किन्तु यदा पर्याप्तिसम्बन्धेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अधिकरणम् अन्विष्यते तदा महानसीयत्व-वह्नित्वोभयमेव प्राप्यते ।

तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमहानसीयत्व-वह्नित्वोभयपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तायां महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव वर्तते, न तु केवलवह्नित्वे पर्याप्तायां वह्न्यभावीयप्रतियोगितावच्छेदकतायाम् । तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता पूर्वोक्तरीत्या निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव गृह्यते, न वह्न्यभावीयप्रतियोगितावच्छेदकता इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ? एवमनुयोगितावच्छेदकत्वप्रवेशमन्तराऽपि निरुक्ताऽव्याप्तिनिवारणं सम्भवत्येव ।

किञ्च, एतल्लक्षणानुसारेण पूर्वोक्ताऽसम्भवोऽपि निराक्रियते । तथा हि - पूर्वोक्तरीत्या घटनिष्ठप्रतियोगितानिरूपकभूतलनिष्ठानुयोगितानिरूपकप्रतियोगिता घटे एव भवेत्, न भूतलवृत्तिपटेऽपि, पटनिष्ठप्रतियोगितानिरूपकभूतलनिष्ठानुयोगितानिरूपकप्रतियोगिताऽपि पटे एव भवेत्,

न घटे - इत्यत्र न कोऽपि विवादः अस्माकम् । किन्तु घटनिष्ठप्रतियोगितानिरूपकानुयोगिता यस्मिन् भूतले विद्यते तस्मिन्नेव भूतले पटनिष्ठप्रतियोगितानिरूपकानुयोगिता वर्तते, अर्थाद् घटनिष्ठप्रतियोगितानिरूपकानुयोगिताधिकरणभूतले पटनिष्ठप्रतियोगितानिरूपकानुयोगिता वर्तते एवेति घटनिष्ठप्रतियोगितानिरूपकानुयोगिताधिकरणभूतलवृत्त्यनुयोगितानिरूपकप्रतियोगिता पटेऽपि स्यादेव । एवं पटनिष्ठप्रतियोगितानिरूपकानुयोगिताधिकरणे घटनिष्ठप्रतियोगितानिरूपकानुयोगितायाः सत्त्वाद् घटे पटनिष्ठप्रतियोगितानिरूपकानुयोगिताधिकरणभूतलनिष्ठानुयोगितानिरूपकप्रतियोगिता स्यादेव ।

ततश्च साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपितपर्याप्तीयप्रतियोगिता अभावीयप्रतियोगितावच्छेदकतायां न भवतु, एवम् अभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगितानिरूपकप्रतियोगिताऽपि साध्यतावच्छेदकतायां मास्तु तथापि यत्र साध्यतावच्छेदकता अभिप्रेताऽभावीयप्रतियोगितावच्छेदकता च एकस्मिन्नेवाधिकरणे वर्तेते, यथा 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र साध्यतावच्छेदकताऽपि वह्नित्वे वर्तते, वह्न्यभावीयप्रतियोगितावच्छेदकताऽपि वह्नित्वे वर्तते तत्र साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणवह्नित्वनिष्ठानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणे वह्नित्वे वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः सत्त्वात् । एवं वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणवह्नित्वनिष्ठानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायां भवेदेव, वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणे वह्नित्वे साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः सत्त्वात् ।

तथा चैवं लक्षणसमन्वयो भवेत् - यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन वह्नित्वे वर्तमानतया वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणविधया वह्नित्वस्य प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणमपि वह्नित्वमेव प्राप्यते, वह्नित्वे च तादृशानुयोगिता पर्याप्तिसम्बन्धेन वर्तते इति वह्नित्वं तादृशानुयोगितायाः पर्याप्त्यधिकरणं कथ्यते । महानसीयवह्न्य-

भावीयप्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेन अधिकरणविधया महानसीयत्व-वह्नित्वोभयस्य प्राप्तेः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन् भवेत् । यद्यपि तादृशानुयोगितायाः स्वरूपसम्बन्धेनाधिकरणविधया केवलं वह्नित्वं प्राप्यते, किन्तु तादृशानुयोगितायाः पर्याप्तिसम्बन्धेनाधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणविधया वह्नित्वं नैव प्राप्यते, महानसीयत्व-वह्नित्वोभयमेव प्राप्यते ।

वह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्वे एव पर्याप्ता, अतः वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणं वह्नित्वमेव भवति । एवं वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताऽपि वह्नित्वे एव पर्याप्ता इति वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमपि वह्नित्वमेव भवेत् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाञ्च भवेत्, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव भवेत् । तत्र वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतानिरूपिता वर्तते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तु निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता वर्तते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते, न वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता, न वा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता । अतः वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः । वह्न्यभावा-

य शो ल ता

धिकरणे च जलह्रदादौ धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ?

एवम् 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि लक्षणसमन्वयः भवत्येव, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितारूपेण महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमाना एव भवेत्, तादृशयत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः स्वरूपसम्बन्धेन अधिकरणविधया केवलमहानसीयत्वमपि प्राप्यते, केवलवह्नित्वमपि प्राप्यते, किन्तु तादृशानुयोगितायाः पर्याप्तिसम्बन्धेन अधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते।

तादृशयत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मानवच्छिन्नसाध्यतावच्छेदकतानिष्ठप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायामेव भवेत्, न महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायां महानसीयत्व-वह्नित्वोभयपर्याप्तायामपि । एवं महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानिरूपकपर्याप्तीय-प्रतियोगिताऽपि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, साध्यतावच्छेदकतायां नैव भवेत् । किन्तु साध्यतावच्छेदकतायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः च पर्याप्तीयानुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तते इति साध्यतावच्छेदकतानिष्ठप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमहानसीयत्व-वह्नित्वोभयस्मिन् महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः सत्त्वात् साध्यतावच्छेदकता-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमहानसीयत्व-वह्नित्वोभयपर्याप्तानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव । एवं महानसीयवह्न्यभावीयप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमहानसीयत्व-वह्नित्वो-भयस्मिन् साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः सत्त्वात् तादृशमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमहान-सीयत्व-वह्नित्वोभयपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायां भवेदेव।

अतः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-पर्याप्त्यधिकरणधर्मपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतायामेव भवेत्, न वह्न्यभावीयप्रतियोगितावच्छेदकतायाम् । अत्र महानसीयवह्न्यभावीय-

प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरण-धर्मपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रया-वच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते, न वह्न्यभावीय-प्रतियोगितावच्छेदकता ।

तथा च महानसीयवह्न्यभावः एव धर्तव्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षण-समन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ? ततश्च अनुयोगितावच्छेदकत्वप्रवेशमन्तराऽपि उक्तरीत्या लक्षणाऽङ्गीकारेणैव सर्वसामञ्जस्ये किमर्थमनुयोगितावच्छेदकत्वपर्यन्तमनुधावनम्" ***इति;***

तत्तुच्छम्, पर्याप्तिद्वितयप्रवेशापेक्षया अनुयोगितावच्छेदकत्वघटितलक्षणस्य लघुतरत्वादिति स्पष्टमेव । न च तत्र पर्याप्तिचतुष्टये एकाऽपि पर्याप्तिः न्यूनीकर्तुं शक्यते, अव्याप्त्यादेरापत्तेः। तथा हि - यदि प्रथमा पर्याप्तिः न निवेश्यते तदा एवं लक्षणम् -

यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितापर्याप्त्यधिकरण-पर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रया-वच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति । एतल्लक्षणानुसारेण 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः भवेत्, यतः पूर्वं यथा प्रदर्शितं तथा प्रकृते साध्यतावच्छेदकता पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्, किन्तु स्वरूपसम्बन्धेन तु केवलमहान-सीयत्वेऽपि, केवलवह्नित्वेऽपि च वर्तते, अतः साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूप-सम्बन्धावच्छिन्नानुयोगिता केवलवह्नित्वेऽपि वर्तते, केवलमहानसीयत्वेऽपि वर्तते। किन्तु साध्यता-वच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगिता या वह्नित्वे वर्तते सा वह्नित्वे एव भवेत्, न महानसीयत्वेऽपि, या च महानसीयत्वे भवेत्, सा महानसीयत्वे एव स्यात्, न वह्नित्वेऽपि । इयञ्च साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वेन अवच्छेदकतात्वेन चैवाऽ-वच्छिन्ना, नान्येन केनचिदिति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना हि सा साध्यता-

य शो ल ता

वच्छेदकतानिष्ठप्रतियोगिता गृह्यते । तादृशयत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगितायाः पर्याप्तिसम्बन्धेन अधिकरणविधया महानसीयत्वमपि प्राप्यते, वह्नित्वमपि, महानसीयत्वेऽपि वह्नित्वेऽपि च तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण ग्राह्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगितायाः पर्याप्तत्वात् ।

प्रकृते यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितापर्याप्त्यधिकरणविधया वह्नित्वं गृह्यते । तत्र वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगिता वह्नित्वे एव वर्तते, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेन वह्नित्वे एव वर्तमानत्वात् । तादृशानुयोगितायाः पर्याप्तिसम्बन्धेनाधिकरणमपि वह्नित्वमेवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितापर्याप्त्यधिकरणवह्नित्वे तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः पर्याप्तत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकानुयोगितापर्याप्त्यधिकरणधर्म-पर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाश्च प्रतियोगितया अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वात् तदितरेणाऽनवच्छिन्नत्वाच्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकानुयोगितापर्याप्त्यधिकरणवह्नित्वपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण तादृशवह्न्यभावीयप्रतियोगिता-वच्छेदकता धर्तुं शक्यते एव, ततश्च वह्न्यभावोऽपि धर्तुं शक्यते । तादृशवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणासमन्वयात् कुतोऽव्याप्त्याशङ्काविरहः ?

यदि पर्याप्तिः निवेश्यते तदा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगिता एव ग्राह्या भवेत् । साध्यतावच्छेदकता स्वरूपसम्बन्धेन केवलमहानसीयत्वेऽपि वर्तते, केवलवह्नित्वेऽपि, किन्तु पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तते इति साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव

भवेत्, न केवलमहानसीयत्वे न वा केवलवह्नित्वे । तादृशाऽनुयोगिता स्वरूपसम्बन्धेन केवलवह्नित्वेऽपि भवेत्, केवलमहानसीयत्वेऽपि च । किन्तु पर्याप्तिसम्बन्धेन तु महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत् । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते । साध्यतावच्छेदकतानिष्ठप्रतियोगिता प्रकृते यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना एव विद्यते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते । वह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् अवर्तमानत्वात् तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता पर्याप्तिसम्बन्धेन वह्नित्वे एव वर्तते, न तु महानसीयत्व-वह्नित्वोभयस्मिन्निति वह्न्यभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणधर्मपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः असत्त्वाद् वह्न्यभावः धर्तुं न शक्यते ।

किन्तु पूर्वोक्तरीत्या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमानतया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणे पर्याप्तत्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव, सा च प्रतियोगिता निरूपितत्वसम्बन्धेन प्रतियोगितया अवच्छेदकतात्वेन चैवाऽवच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि सा प्रतियोगिता वर्तते । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणमहानसीयत्व-वह्नित्वोभयपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः एव ग्राह्यत्वाद् महानसीयवह्न्यभावः एव धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः? इति प्रथमपर्याप्तिपदकृत्यम् ।

यदि द्वितीया पर्याप्तिः न निवेश्यते, किन्तु 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-

प्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः'- इत्येवमेव लक्षणमङ्गीक्रियते तदापि, 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रैवाऽव्याप्तिः स्यात्, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितारूपेण महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तमाना, प्रकृतसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपिता, पर्याप्तिसम्बन्धावच्छिन्नानुयोगिता एव धर्तुं शक्यते । किन्तु तादृशानुयोगिता पर्याप्तिसम्बन्धेनैव महानसीयत्व-वह्नित्वोभयस्मिन् भवेत्, स्वरूपसम्बन्धेन तु केवलमहानसीयत्वेऽपि स्यात्, केवलवह्नित्वेऽपि स्यात् ।

यथा वह्नित्वगतैकत्वं पर्याप्तिसम्बन्धेनाऽपि महानसीयत्व-वह्नित्वोभयस्मिन्नैव भवेत्, किन्तु वह्नित्वे एव भवेत् । महानसीयत्व-वह्नित्वगतद्वित्वं महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्। किन्तु तदपि पर्याप्तिसम्बन्धेनैव महानसीयत्व-वह्नित्वोभयस्मिन् भवेत्, स्वरूपसम्बन्धेन तु केवलमहानसीयत्वेऽपि भवेत्, केवलवह्नित्वेऽपि भवेत्, तथैव प्रकृतसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्ना हि याऽनुयोगिता वह्नित्वनिष्ठा महानसीयत्वनिष्ठा वा सा पर्याप्त्याऽपि महानसीयत्वे वह्नित्वे वा स्यात्, न तु महानसीयत्व-वह्नित्वोभयस्मिन्, साध्यतावच्छेदकतायाः स्वरूपसम्बन्धेन महानसीयत्वे वा वह्नित्वे वा एव सत्त्वात् । यदि च प्रकृतसाध्यतावच्छेदकतानिष्ठप्रतियोगिता(= यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता)निरूपकपर्याप्त्यनुयोगिता गृह्यते तदा सा महानसीयत्व-वह्नित्वोभयस्मिन् भवेत्, प्रकृतसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन् सत्त्वात् । किन्तु तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽपि स्वरूपसम्बन्धेन केवलमहानसीयत्वेऽपि भवेत्, केवलवह्नित्वेऽपि भवेत्, पर्याप्तिसम्बन्धेनैव महानसीयत्व-वह्नित्वोभयस्मिन् भवेत् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण ग्राह्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः स्वरूपसम्बन्धेन अधिकरणविधया महानसीयत्वस्य वह्नित्वस्य वा ग्राह्यत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणं वह्नित्वं भवेदेव । ततश्च पूर्वोक्तरीत्या वह्न्यभावीयप्रतियोगिता-

वच्छेदकतायाः वह्नित्वे पर्याप्तत्वेन वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितायाः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगिताधिकरणे वह्नित्वे एव पर्याप्तत्वात् तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वाच्च यत्किञ्चित्साध्यतावच्छे-दकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणवह्नित्वपर्याप्तानुयोगिता-निरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छे-दकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छे-दकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

यदि च द्वितीया पर्याप्तिः निवेश्यते तदा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितारूपेण ग्राह्यमहानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितायाः महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमानायाः पर्याप्तिसम्बन्धेनाधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते, न वह्नित्वम्, न वा महानसीयत्वं केवलमिति यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव लभ्यते । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणधर्ममहानसीयत्व-वह्नित्वपर्याप्तानुयोगितानिरूपक-पर्याप्तीयप्रतियोगितायाः वह्नित्वनिष्ठवह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वात्, तादृश-प्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितायाः महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतायां सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितापर्याप्त्यधिकरणधर्मपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपित-प्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं न शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तव्या । तथा च महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिः इति द्वितीया पर्याप्तिरपि

य शो ल ता

अवश्यं निवेशनीया।

यदि तृतीया पर्याप्तिः न निवेश्यते, किन्तु "यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणधर्मवृत्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावा-धिकरणनिरूपितवृत्तित्वाभावः"- इत्येवं लक्षणमङ्गीक्रियते तदा 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः दुर्वारा भवेत् । तथा हि - साध्यतावच्छेदकतायाः प्रकृते वह्नित्वे एव पर्याप्तत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणं वह्नित्वमेव स्यात् ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्ता इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीय-त्वेऽपि स्यात्, वह्नित्वेऽपि स्यात् । तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः स्वरूपसम्बन्धेन अधिकरणं केवलं महानसीयत्वमपि भवति, वह्नित्वमपि भवति इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-वह्नित्वनिष्ठ-साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणे वह्नित्वे महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अधिकरणता भवेदेव। न हि वह्नित्वे महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता न वर्तते इति वक्तुं शक्यते । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्ववृत्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव । अतः एव महानसीयत्ववृत्त्यनुयोगितानिरूपक-पर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, वह्नित्ववृत्त्यनुयोगिता-निरूपकपर्याप्तीयप्रतियोगिताऽपि च इति वक्तुं शक्यते एव ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तमाना यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताधिकरणवृत्त्यनुयोगितानिरूपकपर्याप्तीयप्रतियोगिता प्रतियोगितया अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रति-योगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-

निरूपिताऽपि वर्तते । अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितापर्याप्त्यधिकरणवृत्त्यनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चि-न्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते, तथा च महानसीयवह्न्यभावोऽपि ग्राह्यः भवेत्, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि तृतीया पर्याप्तिः निवेश्यते तदा नोक्ताऽऽपत्तिः, यतः महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता वह्नित्वे वर्तते स्वरूपसम्बन्धेन, न तु पर्याप्ति-सम्बन्धेन, अर्थात् तादृशपर्याप्त्यनुयोगिता वह्नित्वे स्वरूपसम्बन्धेन वर्तमाना, न तु पर्याप्ता । यथा शिबिकावहनशक्तिः चतुर्षु पुरुषेषु एव पर्याप्ता वर्तते । चैत्र-मैत्र-यज्ञदत्त-देवदत्तलक्षण-पुरुषेषु पर्याप्ता हि सा चैत्रेऽपि वर्तते, मैत्रेऽपि वर्तते, अर्थात् शिबिकावहनशक्तिः चैत्रे वर्तमाना कथ्यते न तु चैत्रे पर्याप्ता इति चैत्रवृत्तिशक्तिरूपेण शिबिकावहनशक्तिः धर्तुं शक्यते, चैत्रपर्याप्त-शक्तिरूपेण नैव, शिबिकावहनशक्तेः चैत्रादौ चतुर्षु एव पर्याप्तत्वात् । एवं महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्तीया या अनुयोगिता सा वह्नित्वे महानसीयत्वे वा वर्तमाना अस्ति, किन्तु महानसीयत्वे वह्नित्वे वा पर्याप्ता नास्ति, पर्याप्ता तु महानसीयत्व-वह्नित्वोभयस्मिन्नेव अस्ति ।

तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-पर्याप्त्यधिकरणवह्नित्वे तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितायाः वर्तमानत्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगित-निरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्व*वृत्त्य*नुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेत्, किन्तु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानव-च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वे तादृशमहानसीयवह्न्यभावीयप्रतियो-गितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः पर्याप्तत्वाभावाद् यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्व*पर्याप्ता*-नुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव भवेत् ।

वह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्ट्यप्रतियोगिता-

वच्छेदकतायाश्च वह्नित्वे यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितापर्याप्त्यधिकरणे पर्याप्तत्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वपर्याप्तानुयोगितानिरूपकपर्याप्तीय-प्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतायाञ्च वर्तते । तत्र वह्नित्ववृत्तितावैशिष्टवह्न्यभावीयप्रतियोगितावच्छेद-कतायां वर्तमाना तादृशप्रतियोगिता प्रतियोगित्वेन, अवच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्येन चाऽवच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता नास्ति, वह्न्यभावीयप्रतियोगिता-वच्छेदकतानिष्ठप्रतियोगिता तु प्रतियोगित्वेन अवच्छेदकतात्वेन चाऽवच्छिन्नत्वात्, तदतिरिक्तेनाऽ-नवच्छिन्नत्वाच्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता अस्ति ।

तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-पर्याप्त्यधिकरणवह्नित्वपर्याप्ताऽनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता एव गृह्यते, न महान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्ववृत्तितावैशिष्टा महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमाना वा । तथा च वह्न्यभावः एव धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्का इति तृतीया पर्याप्तिरपि आवश्यकी ।

यदि च चतुर्थपर्याप्तिः न निवेश्यते, किन्तु 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपक-निरूपितत्वसम्बन्धा-वच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधि-करणनिरूपितवृत्तित्वाभावः'- इत्येवमेव लक्षणमभ्युपगम्यते तदापि 'पर्वतो वह्निमान् धूमाद्'- इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः भवेदेव, यतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्, किन्तु स्वरूपसम्बन्धेन तु केवलमहान-सीयत्वेऽपि, केवलवह्नित्वेऽपि च भवेत् । तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-

निष्ठप्रतियोगितानिरूपकपर्याप्तिसम्बन्धावच्छिन्नानुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्ता, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगिता केवलवह्नित्वेऽपि पर्याप्ता भवेत्, केवलमहानसीयत्वेऽपि। तथा च महानसीयत्वनिष्ठानुयोगितानिरूपकप्रतियोगिता वह्नित्वनिष्ठानुयोगितानिरूपकप्रतियोगिता च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्वे वह्नित्वे च पर्याप्तत्वाभावेऽपि वर्तमानत्वेऽविवादात् ।

प्रकृते पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणं वह्नित्वमेव वर्तते । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वे महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकाऽनुयोगितायाः (केवलमहानसीयत्वे केवलवह्नित्वे वा पर्याप्त्या वर्तमानायाः) पर्याप्त्या वर्तमानत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपकप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव, इयञ्च प्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता अपि वर्तते, प्रतियोगितया अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वात् तस्याः इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपक-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते इति महानसीयवह्न्यभावोऽपि धर्तुं शक्यते एव । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः।

यदि च चतुर्थपर्याप्तिः निवेश्यते तदा महानसीयवह्न्यभावमादाय नाऽव्याप्तिः, यतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव विद्यते, स्वरूपसम्बन्धावच्छिन्नायाः तादृशानुयोगितायाः केवलवह्नित्वादौ सत्त्वेऽपि पर्याप्तिसम्बन्धावच्छिन्नायाः तस्याः केवलवह्नित्वादौ असत्त्वात्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः स्वरूपसम्बन्धेन केवलवह्नित्वादौ सत्त्वेऽपि पर्याप्तिसम्बन्धेन असत्त्वात् । स्पष्टञ्च

तत्त्वमेतदिति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्ता भवति । तथा च प्रकृते यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वे महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः पर्याप्त्याऽवर्तमानत्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणवह्नित्वपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव भवेत् । तथा च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं न शक्यते ।

एवं वह्नित्ववृत्तितावि शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताऽपि पूर्वोक्तरीत्या धर्तुं न शक्यते, तादृशप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणपर्याप्तानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः सत्त्वेऽपि निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितायाः असत्त्वात् । ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकता एव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितापर्याप्त्यधिकरणधर्मपर्याप्तानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण धर्तुं शक्यते। तथा च वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयान्नैवाऽव्याप्तिः इति चतुर्थपर्याप्तिरपि अवश्यं निवेशनीया ।

तथा च पर्याप्तिचतुष्टयस्याऽपि एतल्लक्षणे आवश्यकतया अनुयोगितावच्छेदकताघटितलक्षणस्यैव लघुत्वात्तदेवोपादेयमिति कदाग्रहमुक्तमानसतया परिभाव्यमेतत्तत्त्वं पर्युपासितगुरुकुलवासैः।

अनुयोगितावच्छेदकघटिते 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चि-न्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदक-ताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वा-भावः'- इत्येवं लक्षणाङ्गीकारे नास्ति आपत्तिलेशोऽपि इति पूर्वमसकृद्भावितितया स्पष्टमेव।

एतावता "ननु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगिताविशेषणविधया किमर्थं निवेश्यते ? यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिभिन्नत्वस्यैव प्रतियोगिताविशेषणविधया प्रवेश्य यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक.. इत्यादिलक्षणाऽपेक्षया 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छे-दकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियो-गिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवमेव लक्षणाङ्गीकारे लाघवात् ।

लक्षणसमन्वयः एवम् - 'पर्वतो वह्निमान् धूमाद्'- इत्यत्र वह्नित्वनिष्ठसाध्यतावच्छेदकता पर्याप्तिसम्बन्धेन वह्नित्वे वर्तते इति वह्नित्वनिष्ठानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्व-निष्ठसाध्यतावच्छेदकतायां भवत्येव । इयञ्च प्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवति, प्रकृते वह्नित्वनिष्ठसाध्यतावच्छेदकताभिन्नसाध्यतावच्छेदकता नास्ति एव, एका एव साध्यतावच्छेदकता । तथा च वह्नित्वनिष्ठानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता यत्किञ्चित्-साध्यतावच्छेदकतायां = कस्याञ्चिदपि साध्यतावच्छेदकतायां वर्तमाना नास्तीति तु नास्त्येव, अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगिताविधया तादृशवह्नित्वनिष्ठा-नुयोगितानिरूपकपर्याप्तीयप्रतियोगिता धर्तुं शक्यते । ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽ-वृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण या वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता प्राप्यते सैव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितारूपेणाऽपि प्राप्यते । वह्नित्व-निष्ठसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन वह्नित्वे वर्तमानतया वह्नित्वनिष्ठसाध्यतावच्छेदकता-वृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता वह्नित्वे भवतीति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-प्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव भवेत्।

य शो ल ता

प्रकृते वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता साध्यतावच्छेदकतायां वर्तमाना नास्तीति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगितविधया सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगिता न अभिप्रेतवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितावत् साध्यतावच्छेदकतायामवर्तमाना इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते, तादृशप्रतियोगिताश्रयसाध्यतावच्छेदकतायाः वह्नित्वे पर्याप्तत्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वं भवतीति बोध्यम् ।

तादृशवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, तादृशप्रतियोगितायाः वह्नित्वे पर्याप्तावच्छेदकतादौ एव सत्त्वात्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् एव पर्याप्तत्वात्, न केवलवह्नित्वादौ । वह्न्यभावीयप्रतियोगितावच्छेदकता, वह्नित्ववृत्तितावैशिष्ट्य-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता च केवलवह्नित्वे एव पर्याप्तिसम्बन्धेन वर्तेते इति तादृशवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि भवेत्, वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि भवेत् । तत्र वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, या वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया वर्तते सा, प्रतियोगित्वेन, अवच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्येन चावच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित प्रतियोगितारूपेण सा प्रतियोगिता धर्तुं न शक्यते । या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति -वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता सा प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण सा प्रतियोगिता धर्तुं शक्यते ।

अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चि-

य शो ल ता

न्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताऽपि, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताऽपि च धर्तुं नैव शक्येते। तथा च वह्न्यभावः एव एतल्लक्षणानुसारेण ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ?

एवम् 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रापि वह्न्यभावः नैव धर्तुं शक्यते, यतः प्रकृते वह्नित्वे महानसीयत्वे चोभयत्र साध्यतावच्छेदकता वर्तते, ततश्च वह्नित्वेऽनुयोगिता साध्यतावच्छेदकतायां प्रतियोगिता, एवं महानसीयत्वेऽनुयोगिता साध्यतावच्छेदकतायाञ्च प्रतियोगिता भवेदेव । अर्थाद् महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि प्रतियोगिता भवति, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि प्रतियोगिता भवति । तत्र यदि केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा सा वह्नित्वनिष्ठसाध्यतावच्छेदकताभिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वर्तमाना नैव भवेदिति तादृशप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगितारूपा एव । यदि महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमाना प्रतियोगिता गृह्यते तदैव सा प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकतायामवर्तमाना न भवेत् । तथा च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिप्रतियोगिताभिन्ना भवेत् । तादृशप्रतियोगिताश्रयमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्य महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽपि महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्, तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् ।

अत्र यदि वह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते तदा तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वं भवेत्, किन्तु वह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितारूपेण नैव गृह्यते, महानसीयत्ववृत्तिसाध्यतावच्छेदकतायां तस्याः अवृत्तित्वात् । तथा च यत्किञ्चित्साध्यता-

वच्छेदकताऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, न वह्नित्वगतैकत्वम् । तादृशमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तिसम्बन्धेन वर्तमानावच्छेदकतादौ एव भवेदिति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, न तु वह्न्यभावीयप्रतियोगितावच्छेदकतादौ, तस्याः महानसीयत्व-वह्नित्वोभयपर्याप्तत्वाभावात्, वह्नित्वे एव पर्याप्तत्वात् तस्याः । तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते एव ।

ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तु नैव धर्तुं शक्यते । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिः ।

वस्तुतः एतल्लक्षणे उभयत्र नञ्प्रवेशोऽपि नैवाऽऽवश्यकः, किन्तु यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरण-निरूपितवृत्तित्वाभावः - इत्येवमेव लक्षणमङ्गीकार्यम्, तथापि न काऽपि आपत्तिः । 'पर्वतो वह्निमान धूमाद्'- इत्यत्र यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितारूपेण वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता एव गृह्यते । वह्नित्वनिष्ठसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन वह्नित्वे वर्तमानत्वेन वह्नित्वनिष्ठसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-

य शो ल ता

प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितासत्त्वेऽपि वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः असत्त्वात्, वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः सत्त्वेऽपि निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितायाः असत्त्वाच्च ।

ततश्च यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकतायाः एव ग्रहणसम्भवाद् वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ? लक्षणाऽसमन्वयो वा ?

एवम् 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि महानसीयवह्न्यभावमादायाऽव्याप्तिः नैव भवेत्, यतः यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितारूपेण महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन्नपि वर्तमाना प्रतियोगिता एव धर्तुं शक्यते, केवलमहानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिः कथं भवति ? वह्नित्वनिष्ठसाध्यतावच्छेदकतायां तस्याः अवर्तमानत्वात्, एवं वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तमाना प्रतियोगिताऽपि कथं यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिताविधया धर्तुं शक्यते ?, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां तस्या अवर्तमानत्वात् । अतः महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिताविधया गृह्यते, यावत्यः साध्यतावच्छेदकताः तावतीषु वर्तमानत्वात् ।

तथा च महानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तिसम्बन्धेन वर्तमानत्वाद् महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतो-

भयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेदिति यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि महानसीयत्व -वह्नित्वगतद्वित्वमेव भवेत्, ततश्च पूर्वोक्तरीत्या महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितायाः महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतायामेव सत्त्वाद् यावत्साध्यतावच्छेदकत्ववृत्तिप्रतियोगितानिरूपकपर्या-प्त्यनुयोगितावच्छेदकावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते। ततश्च महानसीयवह्न्यभावः एव धर्तव्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ?

इत्थञ्च उभयत्र नञ्प्रवेशविरहप्रयुक्तलाघवेन अस्मल्लक्षणमेव स्वीकार्यम्, केनचिद् अनवच्छिन्न-त्वादिविशेषणस्य प्रवेशे नैतल्लाघवं सम्भवति ।

ननु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्थाने यावत्साध्यतावच्छेदकतावृत्ति-धर्मावच्छिन्नत्वप्रवेशेऽपि नास्ति काचिदनुपपत्तिः । तथा चैवं लक्षणम् - यावत्साध्यतावच्छेदकता-वृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति । 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र वह्नित्वनिष्ठ-साध्यतावच्छेदकतावृत्तिप्रतियोगिता तद्व्यक्तित्वेनाऽवच्छिन्ना भवति, तद्व्यक्तित्वं च यावत्साध्यता-वच्छेदकतावृत्ति, तद्व्यक्तित्वस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तत्वात् । तथा च तद्व्यक्ति-त्वावच्छिन्ना हि सा वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्ति-धर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते ।

तादृशप्रतियोगिताश्रयावच्छेदकतायाः वह्नित्वपर्याप्तत्वाद् वह्नित्वनिष्ठसाध्यतावच्छेदकता-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेदिति यावत्साध्यता-वच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव

भवेत् । पूर्वोक्तरीत्या वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, न तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाम् ।

अतः यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते। तादृशवह्न्यभावः धर्तुं शक्यते इति वह्न्यभावाधिकरणे धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्का ?

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय नाऽव्याप्तिः, यतः निरूपितत्वसम्बन्धेन साध्यत्वम्, अवच्छेदकतात्वञ्चैतदुभयमपि यावत्साध्यतावच्छेदकतायां वर्तमानधर्मविधया गृह्यते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च तादृशसाध्यतावच्छेदकतात्वोभयस्य सत्त्वात् । तथा च निरूपितत्वसम्बन्धेन साध्यत्वेन अवच्छेदकतात्वेन चोभयेन अवच्छिन्ना हि प्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत् । तथा च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते इति यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

ततश्च महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेदिति यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-

य शो ल ता

ऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते इति महानसीयवह्न्यभाव एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नाव्याप्तिः । इत्थञ्चाऽस्माकमपि नञ्द्वयप्रवेशप्रयुक्तगौरवाऽपहृतिः सम्भवत्येवेति चेत् ?

न, तथा सति 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तेः दुर्वारत्वात् । तथा हि - प्रकृते साध्यतावच्छेदकता महानसीयत्वेऽपि वर्तते, वह्नित्वेऽपि वर्तते, तत्र यदि वह्नित्ववृत्तितावैशिष्टा एव साध्यतावच्छेदकता गृह्यते तदा तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येन साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचिदिति अत्र निरूपितत्वसम्बन्धेन साध्यत्वम्, अवच्छेदकतात्वञ्च यावत्साध्यतावच्छेदकतासु वर्तमानधर्मविधया ग्रहीतुं शक्येते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च साध्यताऽवच्छेदकतात्वोभयस्य सत्त्वात् । वह्नित्ववृत्तितावैशिष्ट्यञ्च केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तते, न महानसीयत्वनिष्ठसाध्यतावच्छेदकतायाम् ।

तथा च वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नाऽपि वर्तते, तादृशप्रतियोगितावच्छेदकसाध्यताऽवच्छेदकतात्वोभयस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि सत्त्वात्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि सत्त्वाच्च, यावत्साध्यतावच्छेदकतावृत्तिधर्मभिन्नधर्मावच्छिन्नाऽपि वर्तते, वह्नित्ववृत्तितावैशिष्ट्यस्य तादृशप्रतियोगितावच्छेदकस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव सत्त्वात् । अतः तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मानवच्छिन्ना न कथ्यते, यावत्साध्यताविच्छेदकतावृत्तिधर्मेण एकेनाऽपि अनवच्छिन्नायाः प्रतियोगितायाः एव तथात्वात्, इयञ्च वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिसाध्यताऽवच्छेदकतात्वोभयेन अवच्छिन्ना वर्तते इति यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते ।

तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तिसम्बन्धेन वर्तमानत्वात् तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्निगतैकत्वमेव विद्यते इति यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं वह्नित्वगतैकत्वमेव भवेत् । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपक-

य शो ल ता

पर्याप्तीयप्रतियोगिता तु वह्न्यभावीयप्रतियोगितावच्छेदकतायां भवत्येव, इयञ्च प्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवावच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते, तथा च यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छे-दकवह्नित्वगतैकत्वावच्छिन्नाऽनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते, वह्न्य-भावोऽपि ततः धर्तुं शक्यते । वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एतदव्याप्तिनिराकरणाय यावत्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमपि न निवेशयितुं शक्यते, अव्याप्त्यापादकत्वात् तत्परिष्कारस्य । तादृशपरिष्कारस्याऽर्थः स्यात् - यावत्यः साध्यतावच्छेदकताः स्युः तावतीषु सर्वासु अवृत्तिः यः धर्मः तेनाऽनवच्छिन्ना या प्रतियोगिता सा यावत्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना कथ्यते । तथा च वह्नित्ववृत्तितावैशिष्टसाध्यता-वच्छेदकतानिष्ठप्रतियोगिता पुनरपि यावत्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना एव भवेत्, यतः वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वेन अवच्छेदकतात्वेन वह्नित्व-वृत्तितावैशिष्ट्येन चैवाऽवच्छिन्ना, नान्येन केनचिदिति । तत्र साध्यत्वं यावत्साध्यतावच्छेदकतावृत्ति इति यावत्साध्यतावच्छेदकताऽवृत्तिधर्मविधया तन्न गृह्यते, एवमवच्छेदकतात्वमपि यावत्साध्यतावच्छे-दकतावृत्ति, अतः तदपि यावत्साध्यतावच्छेदकताऽवृत्तिधर्मविधया न गृह्यते। वह्नित्ववृत्तितावैशिष्ट्यं यावत्साध्यतावच्छेदकतावृत्ति नास्ति, किन्तु साध्यतावच्छेदकतायां वृत्ति तु अस्ति एव, महानसीयत्व-निष्ठसाध्यतावच्छेदकतायामवर्तमानत्वेऽपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमानत्वात्।

तथा च यावत्साध्यतावच्छेदकताऽवृत्तिधर्मविधया वह्नित्ववृत्तितावैशिष्ट्यं न गृह्यते, यावत्यः साध्यतावच्छेदकताः स्युः तावतीषु सर्वासु अवर्तमानत्वाभावात्, न हि महानसीयत्वनिष्ठसाध्यता-वच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वह्नित्ववृत्तितावैशिष्ट्यमवर्तमानं वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमानत्वात् । उक्तरीत्या यः धर्मः महानसीयत्वनिष्ठसाध्यता-वच्छेदकतायामपि, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च अवर्तमानः भवेत् स एव धर्मः यावत्साध्यतावच्छेदकताऽवृत्तिधर्मविधया गृह्यते ।

ततश्च वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकविधया ये साध्यत्वावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यलक्षणाः धर्माः प्राप्यन्ते ते सर्वेऽपि यावत्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्याः इति तादृशधर्मत्रितयातिरिक्तसर्वधर्मैः तादृशप्रतियोगितायाः अनवच्छिन्नत्वाद् यावत्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते, तादृशप्रतियोगिताश्रयाऽवच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वाद् वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवतीति यावत्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं भवेदेव । तथा च पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकतायाः ग्रहीतुं शक्यत्वाद् वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

अतः एतदापत्त्यपाकरणाय 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः'- इत्येवमेव लक्षणमङ्गीकरणीयं स्यात्, तत्र च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं नाम यावत्यः साध्यतावच्छेदकताः स्युः तावतीसु यस्यां कस्याञ्चिदपि साध्यतावच्छेदकतायां = कस्याञ्चिदपि एकस्यां साध्यतावच्छेदकतायामवर्तमानधर्मेणाऽपि अनवच्छिन्नत्वम्, ततः सर्वासु साध्यतावच्छेदकतासु अवर्तमानधर्मस्य का कथा ? तेन तु सुतरामनवच्छिन्ना या प्रतियोगिता सैव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते ।

वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकं यत् साध्यत्वावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यधर्मत्रितयं तत्र साध्यत्वमवच्छेदकतात्वञ्च महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते इति यावत्साध्यतावच्छेदकतावृत्ति तादृशं साध्यत्वावच्छेदकतात्वोभयं नैकस्यामपि साध्यतावच्छेदकतायामवृत्ति इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया नैव गृह्यते, वह्नित्ववृत्तितावैशिष्ट्यं वह्नित्वनिष्ठसाध्यतावच्छेदक-

तायामेव वर्तमानं महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां नैव वृत्तिमदिति यत्किञ्चित्साध्यतावच्छेदकतायामवृत्ति वह्नित्ववृत्तितावैशिष्ट्यम्, अतः यत्किञ्चित्साध्यतावच्छेदकतायामवृत्तिवह्नित्ववृत्तितावैशिष्ट्यधर्मेणाऽवच्छिन्ना हि वह्नित्ववृत्तिताविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते । किन्तु केवलसाध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, अतः एव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव ग्राह्या, तादृशप्रतियोगिताश्रयमहानसीयत्व-वह्नित्वोभयनिष्ठसाध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् तादृशमहानसीयत्व-वह्नित्वोभयवृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवतीति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तु महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, न वह्न्यभावीयप्रतियोगितावच्छेदकतायाम्, महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वाभावात्। महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तमाना हि तादृशी प्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवावच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि अस्ति इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते इति महानसीयवह्न्यभाव एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ?

इत्थञ्च भवता तु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितविशेषणविधया अवश्यं निवेशनीयम्, अस्माकं तु यावत्साध्यतावच्छेदकतावृत्तित्वप्रवेशेनाऽपि सर्वं समञ्जसं भवतीति तादृशगुरुलक्षणाऽपेक्षया 'यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-

प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लघु लक्षणमेवाङ्गीकार्यम्, पूर्वोक्तरीत्या नास्त्येतल्लक्षणे कुत्राऽपि अव्याप्त्यवकाशः इति एतल्लक्षणमेव अङ्गीकार्यम्" ***इत्यारेकाऽपि निरस्ता,***

अत्र केचन विदग्धाः एवं वदन्ति - अनुयोगितावत् प्रतियोगिताऽपि साध्यतावच्छेदकताभेदे भिद्यते इति महानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता भिन्ना वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता भिन्ना, किन्तु पर्याप्तिसम्बन्धेन साध्यतावच्छेदकतानिष्ठप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च भवेत्। यदि वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा सा केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव पर्याप्ता भवेत्, एवं महानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिताऽपि केवलमहानसीयत्वनिष्ठसाध्यतावच्छेदकतायामेव पर्याप्ता भवेत् । किन्तु यदा सामान्येन प्रतियोगितायाः पर्याप्त्याधिकरणं गृह्यते तदा महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयम् एव गृह्यते इति बोध्यम् ।

अत्र यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता एव ग्राह्या इति भवता लक्षणे निविष्टम्, तेन महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव गृह्यते, किन्तु तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्येनाऽवच्छिन्ना गृह्यते तदा तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता केवलवह्नित्वे एव भवेत् ।

अयम्भावः - पूर्वं महानसीयवह्निवृत्तितावैशिष्टवह्नित्वजात्यवच्छिन्नप्रतियोगिताकाभावः आपत्त्यापादनार्थं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र स्थले एव गृहीतः आसीत्, तत्रैतत् सुसूक्ष्मरीत्या पश्यतु - वह्नित्वजातिः जातिरेव भवति, केवलं सा महानसीयवह्निवृत्तितावच्छिन्ना गृह्यते । एवं यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता या वर्तते सैव वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्येनाऽवच्छिन्ना गृह्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्यावच्छिन्नयावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितारूपेण वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमाना प्रतियोगिता गृह्यते एव । ***न च*** वदतो व्याघातः, यावत्साध्यतावच्छेदकतायां वर्तमाना भवेत्, ततः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्येनाऽवच्छिन्ना कथं भवेत् ? वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिता-

वैशिष्ट्येनाऽवच्छिन्ना भवेत्, ततः यावत्साध्यतावच्छेदकतायां वर्तमाना कथं भवेत् ? यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितावैशिष्ट्यावच्छिन्नत्वप्रवेशे तस्याः यावत्साध्यतावच्छेदकतावृत्तित्वविलयात्, तथा चैतन्न सम्भव***तीति वाच्यम्,***

यतः महानसीयवह्निवृत्तितावैशिष्ट्यविशेषणेन वह्नित्वस्य जातित्वमपहृतम्, वह्नित्वस्य जातित्वं स्वरूपम्, अन्यविशेषणप्रक्षेपेण तच्च्यावनं कथं शक्यम् ? एवं देवदत्तीयत्वविशिष्टा अङ्गुलिः अङ्गुलिस्तु भवत्येव, न च तेन अङ्गुलित्वनिरासः भवति, अङ्गुलित्वस्य व्यापकत्वं देवदत्तीयत्वस्य व्याप्यत्वम्, व्याप्यधर्मावच्छिन्नं हि व्यापकधर्मविशिष्टं न स्वस्य व्यापकधर्मविशिष्टत्वं जहातीति सम्यग् विभावनीयम् ।

तथा च प्रकृतेऽपि यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता यदि वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्येनाऽवच्छिन्ना भवेत् तर्हि सा वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत्, यावत्साध्यतावच्छेदकतावृत्त्यपि कथ्यते । यदि साध्यतावच्छेदकतात्वोभयावच्छिन्ना यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा तु सा महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायाम् अपि भवेत्, यदि च वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्येनाऽपि अवच्छिन्ना यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा सा वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत्, यदि च महानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्येनावच्छिन्ना सा यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा सा महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत् ।

तथा च वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव लब्धम्, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च तादृशी प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता एवाऽस्ति ।

अतः यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-

वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते, ततः वह्न्य-भावोऽपि धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽ-व्याप्तिरिति सूक्ष्ममीक्षणीयम् ।

यदि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगिताविशेषणविधया निवेश्यते तदा न स्यादेव उक्ताऽव्याप्तिः, यतः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तितावैशिष्ट्यावच्छिन्ना यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता साध्यत्वेन अवच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्येन चावच्छिन्ना भवति, अत्र साध्यत्वाऽवच्छेदकतात्वोभयं महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्म-विधया नैव गृह्यते, किन्तु वह्नित्ववृत्तितावैशिष्ट्यं वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां नैव वर्तते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति एव वह्नित्ववृत्तितावैशिष्ट्यम्, ततः तादृशवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्ना यावत्साध्यतावच्छेदकतावृत्ति-प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिवह्नित्ववृत्तितावैशिष्ट्यधर्मेण अवच्छिन्ना एव भवेत्, नानवच्छिन्ना ।

अतो यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तिता-वैशिष्ट्यावच्छिन्नयावत्साध्यतावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते । किन्तु साध्यत्वेन अवच्छेदकतात्वेन चोभयधर्मेणाऽवच्छिन्ना प्रतियोगिता एव धर्तुं शक्यते, साध्यत्वस्य अवच्छेदकता-त्वस्य च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वात् । तादृशसाध्यत्वावच्छेदकता-त्वोभयधर्मेणैवाऽवच्छिन्ना, तदतिरिक्तेन अनवच्छिन्ना हि प्रतियोगिता महानसीयत्वनिष्ठसाध्यता-वच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, साध्यतावच्छेदकतात्वोभय-स्याऽपि उभयत्र वृत्तित्वात् । तथा च तादृशप्रतियोगिताश्रयविधया लभ्यमहानसीयत्वनिष्ठसाध्यता-वच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्य पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तमानत्वात् तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्ति-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेदिति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता पूर्वोक्तरीत्या महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तिसम्बन्धेन वर्तमानाऽवच्छेदकतादौ एव भवेदिति तादृशमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव भवेत् । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते इति महानसीयवह्न्यभावः एव धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वेहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

विद्वत्तल्लजास्त्वेवं ब्रुवन्ति - यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकेत्यादिलक्षणाभ्युपगमे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः ध्रुवा, तद्यथा - प्रकृते महानसीयवह्न्यभावीया या महानसीयत्वनिष्ठा प्रतियोगितावच्छेदकता या च वह्नित्वनिष्ठा साध्यतावच्छेदकता - एतदुभयवृत्तिप्रतियोगिता गृह्यते । एतादृशावच्छेदकताद्वितयाधिकरणविधया महानसीयत्व-वह्नित्वोभयमेव प्राप्यते । साध्यतावच्छेदकता प्रकृते एका वह्नित्वनिष्ठा एवेति महानसीयत्वनिष्ठा प्रतियोगितावच्छेदकता गृहीता। महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया महानसीयत्वं लभ्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायाश्चाधिकरणविधया वह्नित्वं लभ्यते इति तादृशप्रतियोगिता-साध्यतावच्छेदकताद्वितयस्य अधिकरणविधया महानसीयत्व-वह्नित्वोभयं प्राप्यते एवेति तादृशावच्छेदकताद्वयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

एषा हि प्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते एव, प्रकृते साध्यतावच्छेदकता वह्नित्वनिष्ठा एकैवेति वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमाना प्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिः कथ्यते एव। प्रकृते गृहीता प्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायां

वर्तते एवेति यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितावि‌धया सा प्रतियोगिता गृह्यते, तादृश-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्य प्राप्तेः यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं स्यादेव।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता पूर्वोक्तरीत्या महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयाऽपि वर्तते, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपिताऽपि वर्तते इति यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकता गृह्यते । तथा च महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च पर्वतादौ धूमहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितेत्यादिरीत्या लक्षणाभ्युपगमे नेयमव्याप्तिः। यतः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभय-वृत्तिप्रतियोगिता निरूपितत्वसम्बन्धेन प्रतियोगितया साध्यतया, अवच्छेदकतात्वेन चावच्छिन्ना। तत्र साध्यत्वम् अवच्छेदकतात्वञ्च वह्नित्वनिष्ठसाध्यतावच्छेदकतयां वर्तते इति यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्ति न कथ्यते किन्तु तत्र प्रतियोगित्वं न विद्यते, प्रतियोगित्वं हि प्रतियोगितावच्छेद-कतायामेव वृत्ति भवति, अतः प्रतियोगित्वं यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति इति तदवच्छिन्ना सा प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण कथं धर्तुं शक्यते ? ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण पूर्वोक्तरीत्या वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते । ततश्च यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं वह्नित्वगतैकत्वमेव स्यादिति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियो-

य शो ल ता

गितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकता एव प्राप्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता नैवेति वह्न्यभाव एव धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्यव्याप्तिवार्ताऽपि इति यावत्साध्यतावच्छेदकतावृत्तित्वं नैव प्रतियोगिताविशेषणविधया निवेश्यम्, किन्तु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति धर्मानवच्छिन्नत्वमेव निवेशनीयम् ।

न च यावत्साध्यतावच्छेदकतावृत्तित्वस्थाने यावत्साध्यतावच्छेदकतापर्याप्तत्वं निवेश्य 'यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारे नास्त्येवोक्ताऽव्याप्तिः, यतः 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र या महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता गृहीता सा यावत्साध्यतावच्छेदकतावृत्तिः वर्तते, किन्तु यावत्साध्यतावच्छेदकतापर्याप्ता न विद्यते, तत्पर्याप्तत्वं नाम तस्मिन्नेव वृत्तित्वमन्यत्राऽवृत्तित्वं तत्र च सर्वत्र वृत्तित्वमिति यावत्साध्यतावच्छेदकतापर्याप्तत्वं नाम यावत्यः साध्यतावच्छेदकताः तावतीषु सर्वासु वृत्तित्वं तदन्यत्राऽवृत्तित्वञ्च, अतः तादृशप्रतियोगितायाः साध्यतावच्छेदकताभिन्नायां महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तमानत्वात् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितविधया सा प्रतियोगिता न गृह्यते । किन्तु या प्रतियोगिता वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तते, तदतिरिक्तेषु न कुत्रापि वर्तते तादृश्येव प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितविधया गृह्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव स्यात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवेदिति पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकता एव प्राप्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता नैवेति वह्न्यभाव एव धर्तुं शक्यते, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वया-

य शो ल ता

न्नास्त्येवाऽव्याप्तिरिति यावत्साध्यतावच्छेदकतापर्याप्तत्वप्रवेशे नास्ति काऽप्यापत्ति***रिति वाच्यम्,***

यावत्त्व-पर्याप्तिभ्यां घटितपरिष्कारापेक्षया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वप्रवेशे लाघवात्। न हि यावत्त्वं पर्याप्तिं वाऽनिवेश्य तल्लक्षणं निर्दुष्टं भवति। पर्याप्तिनिवेशाऽऽवश्यकताऽनुपदमेव उक्ता, यावत्त्वमनिवेश्य 'साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाभ्युपगमे 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिर्दुवारा, यतः वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तमाना, नान्यत्र कुत्रचिद् वर्तमाना प्रतियोगिता साध्यतावच्छेदकतापर्याप्ता एव कथ्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायां पर्याप्तत्वात् । वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवेत्। तथा च साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात्। तथा च वह्न्यभावः धर्तुं शक्यते । तदधिकरणे च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः।

यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिवेशे नाऽऽपत्तिः, तादृशप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तत्वाऽभावात्। न हि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव पर्याप्ता प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता कथ्यते। किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता, अन्यत्र कुत्रचिदवर्तमाना प्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्ता कथ्यते। तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव लभ्यते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यता-

वच्छेदकतापर्याप्त प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभाव एव धर्तुं शक्यते, न वह्न्यभाव इति नास्त्येवाऽव्याप्तिरिति यावत्त्वं पर्याप्तिश्चोभयमेव निवेशनीयम्, तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वापेक्षया यावत्साध्यतावच्छेदकतापर्याप्तत्वं गुरुभूतमेवेति यत्किञ्चित्-साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वमेव प्रतियोगिताविशेषणविधया उपादेयमिति ।

इत्थञ्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमवश्यं निवेश्य 'यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीकार्यम्, तथा च नोक्ताऽऽपत्तिः ।

अत्र अनुयोगितावच्छेदकत्वप्रवेशं कृत्वाऽपि तदवच्छिन्नत्वविशेषणमनुयोगिताविशेषणविधयाऽवश्यं निवेशनीयम्, केवलतत्सामानाधिकरण्यनिवेशमादृत्य 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमानाधिकरणाऽनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयाऽवच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणाभ्युपगमे 'पर्वतो वह्निमान् धूमाद्'-इत्यादौ अव्याप्तिः दुर्वारा । तथा हि -

'पर्वतो वह्निमान् धूमाद्'- इत्यत्र साध्यतावच्छेदकता वह्नित्वे एव पर्याप्ता इति यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवति । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्ता इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेदिति तादृशानुयोगिता वह्नित्वे वर्तमाना एव कथ्यते, न

तु अवर्तमाना इति वह्नित्ववृत्तित्वं तादृशाऽनुयोगितायामनाविलमिति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वाधिकरणवह्नित्वे तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः वर्तमानत्वात् तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वरूपाधिकरणवृत्ति(=तादृशरूपसमानाधिकरण)अनुयोगितानिरूपकपर्याप्तीयप्रतियोगितावधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते ।

प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमानाधिकरणाऽनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते, ततश्च महानसीयवह्न्यभावोऽपि धर्तुं शक्यते एव, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्येतत्स्थलेऽपि वह्न्यभावमादायाऽव्याप्तिः स्यात्, यतः प्रकृते यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवति । महानसीयत्व-वह्नित्वगतद्वित्वाधिकरणं महानसीयत्वं वह्नित्वञ्च । वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे पर्याप्तत्वेन वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता वह्नित्वे एव भवेत्, वह्नित्वे वर्तमाना हि साऽनुयोगिता महानसीयत्व -वह्नित्वगतद्वित्वाधिकरणे अवर्तमाना वर्तते - इति नैव कथयितुं शक्यते, वह्नित्वस्य महानसीयत्व -वह्नित्वगतद्वित्वाधिकरणत्वात् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वाधिकरणवह्नित्वे वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः वर्तमानत्वात्, अतः तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक

समानाधिकरणाऽनुयोगितानिरूपकपर्याप्तीयप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता वृत्तिप्रतियोगिता धर्तुं शक्यते ।

तादृशप्रतियोगिता च प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिताऽपि वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वसमानाधिकरणाऽनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते, अतः वह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि च सामानाधिकरण्यस्थाने अवच्छिन्नत्वं निवेश्यते तदा नोक्ताऽऽपत्तिसद्भावः सम्भवति, यतः पर्वतो वह्निमान् धूमाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपसामानाधिकरण्यं तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां सम्भवति, किन्तु तादृशवह्नित्वगतैकत्वावच्छिन्नत्वं न सम्भवति, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नत्वस्यैव सत्त्वात्, तादृशानुयोगितायाः महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमानतया वह्नित्वगतैकत्वस्य न्यूनवृत्तित्वाच्च । तथा च यथा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमानाधिकरणानुयोगितानिरूपकपर्याप्तीयप्रतियोगिताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते तथा यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः ।

तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-

वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगिताश्रयावच्छेदकताविधयाऽपि वह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते एव । तथा च वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोर-वृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञान-त्वाद् - इत्यत्रापि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वसामानाधिकरण्यं वह्न्यभावीयप्रतियोगितावच्छेदकता-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां सम्भवति, महानसीयत्व-वह्नित्वगतद्वित्वाधिकरण-वह्नित्वे तादृशानुयोगितायाः वृत्तित्वात्, किन्तु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नत्वं वह्न्यभावीय-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां नैव वर्तते, किन्तु वह्नित्वगतै-कत्वावच्छिन्नत्वमेव वर्तते, तादृशानुयोगितायाः वह्नित्वे एव वर्तमानतया महानसीयत्व-वह्नित्वगत-द्वित्वस्यातिरिक्तवृत्तित्वात् । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितायामेव सम्भवति महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नत्वम् ।

अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकता एव धर्तुं शक्यते, न वह्न्यभावीयप्रतियोगितावच्छेदकता इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिरिति अवच्छिन्नत्वमवश्यं निवेशनीयमिति स्थितम् ।

यदि द्वितीया पर्याप्तिः न निवेश्यते, किन्तु 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकावच्छिन्नानुयोगितानिरूपक-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीक्रियते तदा 'पर्वतो वह्निमान् धूमाद्'- इत्यत्र महानसीयवह्न्य-

भावमादायाऽव्याप्तिः भवेदेव, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवतीति नाऽत्र विवादावकाशः ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन् भवति । तत्र पर्याप्तिसम्बन्धेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्वे वह्नित्वे चोभयत्र भवेत्, ततश्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्तिसम्बन्धावच्छिन्नानुयोगिता महानसीयत्वेऽपि भवेत्, वह्नित्वेऽपि च भवेत्, किन्तु स्वरूपसम्बन्धेन तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता केवलमहानसीयत्वेऽपि भवेत्, केवलवह्नित्वेऽपि, पुनरत्र शिबिकावहनशक्तिदृष्टान्तः परिभावनीयः, समवायेन स्वरूपेण वा तादृशी शक्तिः केवलैकस्मिन् पुरुषेऽपि यथा भवति तथा प्रकृतेऽपि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता स्वरूपसम्बन्धेन केवलमहानसीयत्वेऽपि भवेत्, केवलवह्नित्वेऽपि च भवेत् ।

अर्थात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्तिसम्बन्धावच्छिन्नानुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तिसम्बन्धेन वर्तते, तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगिता महानसीयत्वेऽपि पर्याप्तिसम्बन्धेन स्यात्, वह्नित्वेऽपि स्यादिति तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्तिसम्बन्धावच्छिन्नानुयोगितावच्छेदकं महानसीयत्व-वह्नित्वोभयगतद्वित्वमेव भवेत्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकस्वरूपसम्बन्धावच्छिन्नानुयोगितावच्छेदकं महानसीयत्वगतैकत्वमपि भवेत्, वह्नित्वगतैकत्वमपि भवेदिति सूक्ष्मं विचारणीयम् ।

तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वं मास्तु वह्नित्वगतैकत्वे, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगितावच्छेदकत्वं तु वह्नित्वगतैकत्वे सम्भवत्येवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्ववृत्तितावैशिष्ट्या न गृहीताऽस्ति इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना वर्तते, न तु तदतिरिक्तेन वह्नित्ववृत्तितावैशिष्ट्यादिना केनाऽपि इति सा प्रतियोगिता निरूपितत्वसम्बन्धा-

वच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपिता अपि स्यादेव ।

ततश्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपक-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियो-गितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरू-पितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं शक्यते एव । तथा च महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च धूमहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि च पर्याप्तिः निवेश्यते तदा स्पष्टमेव महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नैव भवेत्, महानसीयत्व-वह्नित्व-गतद्वित्वमेव भवेदिति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-
य नुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्य-
शो भावीयप्रतियोगितावच्छेदकतायां नैव भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत् ।
ल तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता
ता -वच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ
-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता नैव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तव्या । ततश्च वह्न्यभावः एव धर्तुं शक्यते, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽ-व्याप्तिः ।

यदि च निरूपितत्वसम्बन्धावच्छिन्नत्वादेः प्रवेशमनङ्गीकृत्य 'यत्किञ्चित्साध्यतावच्छेदकताऽ-वृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीक्रियते तदा 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र लक्षणसमन्वयः सम्भवति, यतः प्रकृते यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-

वह्नित्वगतद्वित्वमेव प्राप्यते, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, महानसीयत्व-वह्नित्वगत-द्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्ता-वच्छेदकतादौ एव सत्त्वात् । न हि वह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्ता इति वह्न्यभावीयप्रतियोगितावच्छेदकतायां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता न सम्भवति ।

ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिताश्रया-वच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते, किन्तु वह्न्यभावीय-प्रतियोगितावच्छेदकता नैव धर्तुं शक्यते इति महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिवार्ताऽपि ।

एवं 'पर्वतो वह्निमान् धूमाद्'- इत्यत्राऽपि महानसीयवह्न्यभावः नैव ध्रियते, यतः यत्किञ्चित्-साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-गतैकत्वमेव भवति । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तु वह्नित्वे पर्याप्तावच्छेदकतादौ एव भवेत् । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता न वह्नित्वे पर्याप्ता इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता नैव भवेत्, किन्तु वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् ।

अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिताश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकता एव गृह्यते, न महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतेति वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षण-समन्वयात् कुतोऽव्याप्तिरिति निरूपितत्वसम्बन्धावच्छिन्नेत्यादि नैव प्रवेशनीयम् - इति नैवाशङ्क-नीयम्, पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्त्यापत्तेः । यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैक-त्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्वे पर्याप्तावच्छेदकतादौ एव भवेत्, नात्र

य शो ल ता

कोऽपि विवादः, तत्र महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्वे नास्ति पर्याप्ता, किन्तु वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्वे एव पर्याप्ता। ततश्च वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव । तादृशप्रतियोगितावच्छेदकतानिरूपित-प्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः प्राप्यते एव, तथा च यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाविधया महानसीय-वह्न्यभावः धर्तुं शक्यते तदधिकरणे च धूमहेतोः वृत्तितया लक्षणसमन्वयान्नाऽव्याप्त्यभावः।

यदि निरूपितत्वसम्बन्धावच्छिन्नेत्यादिकं निवेश्यते तदा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगिता यद्यपि वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते तथापि सा प्रतियोगित्वेन अवच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्येन चावच्छिन्नेति निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नवह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपिता एव वर्तते इति निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण सा वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते । वह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचिदिति निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशप्रतियोगिता धर्तुं शक्यते ।

तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चि-न्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता नैव गृह्यते, वह्न्यभावीयप्रतियोगितावच्छेदकता एव गृह्यते, तथा च वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽऽपत्तिरिति

अत्र बहु वक्तव्यं तत्स्वयमूह्यम् । निरूपितत्वसम्बन्धावच्छिन्नत्वादिप्रवेशप्रयोजनं प्राग्वदुन्नेयम्। इति सार्थक्यप्रक्रिया यथाश्रुतलक्षणस्य।

यदा वह्न्यभावीयप्रतियोगितावच्छेदकता एका एवाऽभ्युपगम्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च तद्व्यक्तित्वेन अवच्छिन्ना अभ्युपगम्यते तदा नोक्तलक्षणं सङ्गच्छते, यतः 'पर्वतो वह्निमान धूमाद्'- इत्यत्र यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकता हि नैव प्राप्यते, या वह्न्यभावीयप्रतियोगितावच्छेदकता तन्निष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अवच्छेदकं यद् वह्नित्वगतैकत्वं तदवच्छिन्नानुयोगितानिरूपकपर्याप्तीया भवति, किन्तु निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता नास्ति तादृशप्रतियोगिता, यतः वह्न्यभावीप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन नाऽवच्छिन्ना, किन्तु तद्व्यक्तित्वेन, सम्भवति लघौ धर्मे गुरौ तदभावादिति तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नतद्व्यक्तित्वनिष्ठप्रतियोगितावच्छेदकतानिरूपिता वर्तते ।

ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितासत्त्वे अपि निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितायाः असत्त्वात् तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता नैव धर्तुं शक्यते ।

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता तन्निष्ठप्रतियोगिता प्रतियोगित्वेन अवच्छेद-

कतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचिदिति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगितारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तते इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत् । ततश्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । अर्थाद् महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतायां भवेत् । तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे पर्याप्तत्वाभावात्तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नैव भवेदिति तादृशमहानसीयवह्न्यभावीयप्रति-
य योगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता नैव भवेत् ।
शो
ल इत्थञ्च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां निरूपितत्वसम्बन्धावच्छिन्न
ता -किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितायाः सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितायाः असत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वधर्मावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्ब-न्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतारूपेण महानसीयवह्न्यभावीयप्रतियो-गितावच्छेदकता नैव धर्तुं शक्यते ।

या वह्नित्ववृत्तितावविशिष्टा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता तन्निष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया भवति, तादृशवह्नित्ववृत्तितावविशिष्टमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन तादृशप्रतियोगितावच्छेदकता-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः । किन्तु

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्ववृत्तितावैशिष्ट्यायाः ग्रहणात् तादृश-वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्येन चाऽवच्छिन्ना भवेत्, ततश्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपिता नैव भवेत् तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, किन्तु निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नवह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगिता-वच्छेदकतानिरूपिता एव भवेत् । ततश्च साऽपि वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्तुं नैव शक्यते, तादृशवह्नित्ववृत्तितावैशिष्ट्य-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽ-वृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयत्वसत्त्वेऽपि निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽ-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वाऽसत्त्वात् ।

तथा च या प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीया भवति सा निरूपित-त्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छे-दकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता न भवति, या च प्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपिता भवति सा प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया न भवतीति प्रकृते 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानव-च्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयनिरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-

प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता एवाऽप्रसिद्धा इति तदाश्रयावच्छेदकतादेरपि अप्रसिद्ध्या संपूर्णञ्च लक्षणमप्रसिद्धं भवेत्, घटकाऽप्रसिद्ध्या तद्घटिताऽप्रसिद्धेः न्याय्यत्वात्। अतः ये वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितां तद्व्यक्तित्वेनाऽवच्छिन्नाम् अभ्युपगच्छन्ति तेषां मते एतल्लक्षणं नैव सङ्गच्छते ।

तेषां मतानुसारेणैवं लक्षणम् - यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

लक्षणसमन्वयः एवम् - पर्वतो वह्निमान् धूमाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव वर्तते, वह्नित्वगतैकत्वाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्वे पर्याप्तावच्छेदकतादौ एव भवेत्। वह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता च वह्नित्वे एव पर्याप्तिसम्बन्धेन वर्तते इति वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि भवेत्, वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि भवेत्, तत्र वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितया, अवच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्येन चावच्छिन्ना । प्रतियोगित्वम् अवच्छेदकत्वात्वञ्चैतदुभयं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, अर्थाद् महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताः यावत्यः वर्तन्ते तावतीषु सर्वासु प्रतियोगितावच्छेदकतात्वोभयं वर्तते, नास्ति तादृशी एकाऽपि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता यत्र प्रतियोगितावच्छेदकतात्वोभयं न भवेत् । तथा च यत्किञ्चित्प्रतियोगिताऽवच्छेदकताऽवृत्तिधर्मविधया प्रतियोगितावच्छेदकतात्वोभयं न प्राप्यते, तस्य यावत्प्रतियोगितावच्छेदकतासु वर्तमानत्वात् । किन्तु वह्नित्ववृत्तितावैशिष्ट्यं न यावत्प्रतियोगितावच्छेदकतासु वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्ववृत्तितावैशिष्ट्यस्य सत्त्वेऽपि महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां तस्याऽसत्त्वात्। तथा च यत्किञ्चित्साध्यतावच्छेदकतायां = महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवृत्तिधर्मरूपेण वह्नित्ववृत्तितावैशिष्ट्यं लभ्यते, तादृशवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्ना हि वह्नित्ववृत्तिता-

विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना न कथ्यते, किन्तु अवच्छिन्ना एव ।

यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता सैव भवेत्, यत्प्रतियोगितावच्छेदकाः सर्वेऽपि धर्माः यावत्यः (अभिप्रेताऽभावीय)प्रतियोगितावच्छेदकताः तासु सर्वासु वर्तमानाः भवेयुः । वह्नित्ववृत्तितावैशिष्ट्यधर्माः तेषु प्रतियोगितावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतासु वर्तमानत्वेऽपि वह्नित्ववृत्तितावैशिष्ट्यस्य यावत्प्रतियोगितावच्छेदकतासु वर्तमानत्वाभावात् तादृशव

वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं न सम्भवति । अतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगिताऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगिता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते ।

या वह्न्यभावीयप्रतियोगितावच्छेदकता तन्निष्ठप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचित् । प्रतियोगित्वावच्छेदकतात्वोभयञ्च वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एवेति यावत्प्रतियोगितावच्छेदकतावृत्ति तद् यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यमेव । तथा च तेनैवाऽवच्छिन्ना, तदतिरिक्तेनाऽनवच्छिन्ना प्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना भवेदेवेति वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण गृह्यते एव। तादृशप्रतियोगिताश्रयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः केवलवह्नित्वे एव पर्याप्तत्वेन वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतायां सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिताऽपि वह्न्यभावीयप्रतियोगितावच्छेदकतायां पूर्वोक्तरीत्या अस्ति एव । तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽपि सत्त्वात्, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्याऽपि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतावच्छेदकतावृत्तिविधया वह्न्यभावीयप्रतियोगितावच्छेदकता गृह्यते । ततश्च वह्न्यभावोऽपि गृह्यते, महानसीयवह्न्यभावो नैव गृह्यते, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः? इति निरूपितत्वसम्बन्धावच्छिन्नेत्याद्यपेक्षया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वप्रवेशस्यैव लघुभूतत्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयावच्छिन्नत्वाङ्गीकर्तृमतेऽपि उक्तरीत्या लक्षणसमन्वयः प्रदर्शितः, ये च तद्व्यक्तित्वाव-

च्छिन्नत्वमेव वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायामङ्गीकुर्वन्ति तेषां मते एवं लक्षणसमन्वयः -

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा तद्व्यक्तित्वेन अवच्छिन्ना भवति, तद्व्यक्तित्वं वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एवेति वह्न्यभावीययावत्प्रतियोगितावच्छेदकतावृत्ति तद्व्यक्तित्वं यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधया अग्राह्यमेव, तथा च तद्व्यक्तित्वेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना हि वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव, तादृशप्रतियोगिताश्रयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव। अतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽपि सत्त्वात्, यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगिताश्रयावच्छेदकतारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकता एव धर्तुं शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता धर्तुं नैव शक्यते । अतः महानसीयवह्न्यभावोऽपि नैव ग्राह्यः, किन्तु वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्त्याशङ्काऽपि ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रापि वह्न्यभावमादायाऽव्याप्तिः न भवेत्, यतः प्रकृते साध्यतावच्छेदकता पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन् वर्तते इति साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नैव प्राप्यते, महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते । यदा च साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना गृह्यते तदा तु सुतरां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवेत् ।

या वह्न्यभावीयप्रतियोगितावच्छेदकता वर्तते तन्निष्ठप्रतियोगिता तद्व्यक्तित्वेन अवच्छिन्ना, तद्व्यक्तित्वञ्च वह्न्यभावीयवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तते एव, न हि एतदतिरिक्ता

काऽपि वह्न्यभावीयप्रतियोगितावच्छेदकता इति तद्व्यक्तित्वस्य वह्न्यभावीयप्रतियोगितावच्छेदकता-सामान्यवृत्तितया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया तद्व्यक्तित्वं नैव गृह्यते, तद्व्यक्तित्वाऽतिरिक्तेन अनवच्छिन्ना हि सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, अतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । किन्तु तादृशप्रतियोगिताश्रयावच्छेदकतायाः केवलवह्नित्वे पर्याप्तत्वेन तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत्, न महानसीयत्व-वह्नित्वगतद्वित्वमिति वह्नित्वगतैकत्वावच्छिन्नानु-योगितानिरूपकपर्याप्तीयप्रतियोगिता एव वह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेत्, महानसीयत्व -वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियो-गितावच्छेदकतायां स्यात्, वह्नित्वनिष्ठवह्न्यभावीयप्रतियोगितावच्छेदकतायां तु नास्त्येव ।

तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धा-वच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यथा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगिता धर्तुं न शक्यते तथैव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय -यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियगितारूपेणाऽपि तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्-साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व -वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य असत्त्वात् ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्ता इति तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अवच्छेदकं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेदिति महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयो-गितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव। तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन

चैवाऽवच्छिन्ना, नान्येन केनचित् । तत्र प्रतियोगित्वमपि महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाञ्च वर्तते, अवच्छेदकतात्वमपि उभयत्र विद्यते इति यावत्प्रतियोगितावच्छेदकतावृत्ति तादृशधर्मद्वितयं यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया कथं गृह्यते ?

तथा च तादृशप्रतियोगित्वाऽवच्छेदकतात्वलक्षणधर्मद्वितयेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना हि प्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना एव भवेत् । इत्थञ्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽपि सत्त्वात्, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव । अतः महानसीयवह्न्यभावः एव धर्तुं शक्यते, न वह्न्यभावः । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्का ? एवं यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमेव निवेशनीयम् ।

अत्र यदि यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं न निवेश्यते तदा 'पर्वतो वह्निमान् धूमाद्'- इत्यत्र अव्याप्तिः भवेदेव, यतः पूर्वोक्तरीत्या 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणाङ्गीकारे यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं यद्रूपं वह्नित्वगतैकत्वं तदवच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितारूपेण वह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताऽपि धर्तुं शक्यते, वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताऽपि धर्तुं शक्यते, ततः महानसीयवह्न्यभावोऽपि धर्तुं शक्यते एव । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि च प्रतियोगितावच्छेदकतात्वावच्छिन्नत्वं निवेश्य 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मा-

नवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगम्यते तदापि पर्वतो वह्निमान् धूमाद् - इत्यत्र पूर्वोक्तरीत्या महानसीयवह्न्यभावः धर्तुं शक्यते एव, यतः पर्वतो वह्निमान् धूमाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपेणाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीया या महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्ट्यप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा वह्नित्ववृत्तितावैशिष्ट्येन प्रतियोगितावच्छेदकतात्वेन चावच्छिन्ना वर्तते एवेति वह्नित्ववृत्तितावैशिष्ट्यावच्छिन्ना प्रतियोगितावच्छेदकतात्वावच्छिन्ना च सा प्रतियोगिता प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितारूपेण गृह्यते एव, न तु न गृह्यते।

अतः वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगितावच्छेदकतात्वावच्छिन्नत्वस्याऽपि सत्त्वात्, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । तादृशप्रतियोगिताश्रयवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः गृह्यते एव, महानसीयवह्न्यभावाधिकरणे च धूमहेतोरवृत्तिताभावाल्लक्षणाऽसमन्वयात् कुतोऽव्याप्त्यभावः ?

किञ्च एतल्लक्षणानुसारेण पर्वतो वह्निमान् धूमाद् - इत्यत्रैव लक्षणसमन्वयार्थमनिवार्यः वह्न्यभावः एव धर्तुं न शक्यते, यतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं वर्तते, तादृशप्रतियोगिताश्रयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात्, किन्तु तादृशप्रतियोगिता तद्व्यक्तित्वेनाऽवच्छिन्ना अभ्युपगता, न तु प्रतियोगितावच्छेदकतात्वेन, प्रतियोगितावच्छेदकतात्वधर्मस्य तद्व्यक्तित्वापेक्षया गुरुत्वात्, तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्-

साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वसत्त्वेऽपि प्रतियोगितावच्छेदकतात्वावच्छिन्नत्वाऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-गतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते, ततः वह्न्यभावोऽपि धर्तुं शक्यः नैव। हा ! महदसमञ्जसं समजनि - महानसीयवह्न्यभावः एव धर्तुं शक्यते, वह्न्यभावः धर्तुमपि न शक्यते । ततश्च नेदं लक्षणं सर्वथा ग्राह्यम् । अत्र वह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगितायाः तद्व्यक्तित्वावच्छिन्नत्वाभ्युपगन्तृमतेन लक्षणं क्रियते इति अवधातव्यम् ।

यदि उक्ताऽऽपत्त्यपाकरणाय तद्व्यक्तित्वावच्छिन्नत्वं निवेश्य 'यत्किञ्चित्साध्यतावच्छेदकत्वा-ऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्ना-नुयोगितानिरूपकपर्याप्तीय-तद्व्यक्तित्वावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः'- इति लक्षणमेवाऽभ्युपगम्यते तदा पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्न्यभावो धर्तुं शक्यते, यतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमस्त्येव, तद्व्यक्तित्वावच्छिन्नत्वमपि वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वर्त्तते । अतः यत्किञ्चित्साध्यतावच्छेदकत्वाऽ-वृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-तद्व्यक्तित्वावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभाव-विधया वह्न्यभावः धर्तुं शक्यते एव । तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्का ?

महानसीयवह्न्यभावश्च प्रकृते नैव धर्तुं शक्यते, यतः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया वर्तते, किन्तु तद्व्यक्तित्वाऽवच्छिन्ना नैव, तद्व्यक्तित्वञ्च प्रकृते वह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्ति गृह्यते, तदवच्छिन्ना हि प्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, महानसीय-वह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतायां कथं भवेत् ? तथा च वह्नित्ववृत्तिता-

विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वसत्त्वेऽपि तद्व्यक्तित्वावच्छिन्नत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-तद्व्यक्तित्वावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः नैव धर्तुं शक्यते, वह्न्यभावः एव धर्तव्यः। ततः काऽऽपत्तिः ?

किन्तु एवं लक्षणाऽभ्युपगमे अन्यत्र कुत्राऽपि लक्षणसमन्वयः नैव भवेत्, यतः 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र लक्षणसमन्वयार्थमावश्यकः महानसीयवह्न्यभावोऽपि धर्तुं नैव शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताऽपि महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तते, साध्यतावच्छेदकताऽपि महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तते, ततश्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । तथा च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव, इयञ्च प्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तद्व्यक्तित्वेन नैव, तथा च तद्व्यक्तित्वावच्छिन्नत्वाऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयतद्व्यक्तित्वावच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते, ततः महानसीयवह्न्यभावः धर्तुं नैव शक्यते इति कमभावमादाय लक्षणसमन्वयः भविष्यति इति महदसामञ्जस्यमिति।

यदि चैतदापत्तिभया प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं निवेश्य 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूकपर्याप्तीय-प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगम्यते तदा 'पर्वतो

वह्निमान् धूमाद्'- इत्यत्र एवं लक्षणसमन्वयः भवेत् - अत्र वह्न्यभावः गृह्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया अस्त्येव । तादृशप्रतियोगिता च तद्व्यक्तित्वेन अवच्छिन्ना, तद्व्यक्तित्वं वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव, न तु न वर्तते इति वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिभिन्नं नास्ति तद्व्यक्तित्वम्, किन्तु वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति एव, ततश्च तद्व्यक्तित्वभिन्नेन अनवच्छिन्ना वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना कथ्यते एव ।

अतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमपि वर्तते, प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमपि वर्तते, ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, अतः वह्न्यभावोऽपि धर्तुं शक्यते, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय अव्याप्तिः नैव भवेत्, यतः प्रकृते यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तावच्छेदकतादौ एव भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकता न महानसीयत्व-वह्नियत्वोभयस्मिन् पर्याप्ता इति वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया नैव भवेत् । तादृशप्रतियोगिता तद्व्यक्तित्वेनाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना, तद्व्यक्तित्वस्य च वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तमानतया प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया तद्व्यक्तित्वं नैव गृह्यते ।

ततश्च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-

य शो ल ता

पर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वाऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते। ततश्च वह्न्यभावोऽपि धर्तुं न शक्यते । या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियगिता सा प्रतियोगित्वेन अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचित्, प्रतियोगिताऽवच्छेदकतात्वोभयञ्च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते । अतः प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया प्रतियोगिताऽवच्छेदकतात्वोभयमपि न गृह्यते, तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना भवत्येव । तादृशप्रतियोगिताश्रयमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वात् तादृशयत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिताऽपि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां भवत्येव ।

तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यापि सत्त्वात् प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । अतः महानसीयवह्न्यभावोऽपि धर्तुं शक्यते । तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्का ?

किन्तु तादृशलक्षणाङ्गीकारे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादाय कथमव्याप्तिः न स्यात् ? किन्तु स्यादेव, तथाहि - ***यद्यपि*** महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकताऽवृत्ति-

धर्माऽनवच्छिन्नप्रतियोगितारूपेण ग्राह्यत्वं नास्ति, यतः तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगित्वेन अवच्छेदकतात्वेन चैवावच्छिन्नत्वेन, तदतिरिक्तेनाऽनवच्छिन्नत्वेन, प्रतियोगितावच्छेदकतात्वोभयस्य तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेन च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगिताऽवच्छेदकताऽवृत्तिधर्माऽनवच्छिन्नत्वं सम्भवति, किन्तु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता च वह्नित्वे पर्याप्तावच्छेदकतादौ एव भवेत्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता तु न वह्नित्वे पर्याप्ता, किन्तु महानसीयत्व-वह्नित्वोभयस्मिन्निति तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नैव सम्भवतीति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वाऽसत्त्वात् प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते । अतः महानसीयवह्न्यभावोऽपि धर्तुं शक्यः न स्यात्,

य शो ल ता

तथापि या वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता वर्तते, तन्निष्ठा प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, यतः वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता केवलवह्नित्वे एव पर्याप्ता, अतः वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तादृशवह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव अस्ति इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानव-

च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगिता तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, इयञ्च प्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येन, प्रतियोगित्वेन, अवच्छेदकतात्वेन चावच्छिन्ना, नान्येन केनचित् । वह्नित्ववृत्तितावैशिष्ट्यम्, प्रतियोगित्वम्, अवच्छेदकतात्वञ्चैतत्त्रितयमपि प्रतियोगितावच्छेदकतायां वर्तमानमेव ननु । तत्र प्रतियोगिताऽवच्छेदकतात्वोभयं महानसीयत्व-निष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्व-वृत्तितावैशिष्ट्यञ्च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामवर्तमानमपि वह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतायां वर्तते एवेति प्रतियोगितावच्छेदकतायां वृत्ति एव कथ्यते, न तु अवृत्ति । तथा च प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया प्रतियोगित्वमपि न गृह्यते, अवच्छेदकतात्वमपि न प्राप्यते, वह्नित्ववृत्तितावैशिष्ट्यमपि न लभ्यते, एतत्त्रितयेन चैवावच्छिन्ना सा प्रतियोगिता, तदतिरिक्तेनाऽनवच्छिन्ना इति प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमपि वह्नित्ववृत्तिता-
य विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां स्यादेव ।

शो ततश्च वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्-
ल साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-
ता रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यापि सत्त्वात्, प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-त्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकत्वा-ऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । ततश्च महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तादृशप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकत्वात् । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणासमन्वयात् कुतोऽव्याप्त्यभावः ?

यदि यावत्प्रतियोगितावच्छेदकतावृत्तित्वं निवेश्य 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मा-नवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-याव-त्प्रतियोगितावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपका-भावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगम्यते तदाऽपि पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः स्यादेव, यतः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्य-

भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येन प्रतियोगित्वेन अवच्छेदकतात्वेन चावच्छिन्ना वर्तते, तत्र वह्नित्ववृत्तितावैशिष्ट्यं वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव विद्यते, महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां नैव विद्यते इति यावत्यः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताः वर्तन्ते तावतीषु सर्वासु वह्नित्ववृत्तितावैशिष्ट्यं नैव वर्तते, अतः यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मविधया वह्नित्ववृत्तितावैशिष्ट्यं नैव गृह्यते, किन्तु प्रतियोगित्वावच्छेदकतात्वोभयं तु महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते इति यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मविधया प्रतियोगितावच्छेदकतात्वोभयमपि प्राप्यते एव ।

तदवच्छिन्ना च वह्नित्ववृत्तितावि्शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता इति यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मावच्छिन्नत्वं वह्नित्ववृत्तितावि्शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां स्यादेव, तत्र यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वन्तु वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावि्शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, तदाश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणसमन्वयाऽसम्भवात् स्यादेवाऽव्याप्तिः ।

यदि यावत्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिवेशमादृत्य 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः'– इत्येवं लक्षणमङ्गीक्रियते तदा आपाततः 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः न भवेत्, तथा हि - पूर्वोक्तरीत्या वह्नित्ववृत्तितावि्शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता-वह्नित्ववृत्तितावैशिष्ट्येन प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तत्र प्रतियोगिताऽवच्छेदकतात्वोभयं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियो-

गितावच्छेदकतायामपि वर्तते इति यावत्प्रतियोगितावच्छेदकतावृत्ति भवति, किन्तु वह्नित्ववृत्तितावैशिष्ट्यं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां न विद्यते, केवलं वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव विद्यते इति वह्नित्ववृत्तितावैशिष्ट्यं यावत्प्रतियोगितावच्छेदकतावृत्ति नास्ति, अर्थाद् वह्नित्ववृत्तितावैशिष्ट्यं यावत्प्रतियोगितावच्छेदकताऽवृत्ति वर्तते, तेन चावच्छिन्ना सा वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना न भवति ।

अतः वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वसत्त्वेऽपि यावत्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वविरहाद् यत्किञ्चित्साध्यताऽवच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयवह्न्यभावीयवह्नित्ववृत्तिताविशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते, तदाश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः धर्तुं न शक्यते, किन्तु वह्न्यभावः एव ग्राह्यः, यतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना (वह्नित्ववृत्तितावैशिष्ट्येन नावच्छिन्ना) प्रतियोगितावच्छेदकतात्वोभयञ्च वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां विद्यते, प्रकृते प्रतियोगितावच्छेदकता एकैव वह्नित्वनिष्ठा इति यावत्प्रतियोगितावच्छेदकतावृत्ति तत्, तदतिरिक्तेनाऽनवच्छिन्ना वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना एव भवेत्, तादृशप्रतियोगिता च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया तु वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययावत्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । ततश्च वह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिः ।

किन्तु एतदव्याप्तिनिवारणम् आपाततः एव, यतः यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मा-

नवच्छिन्नप्रतियोगिता सा कथ्यते या यावत्यः प्रतियोगितावच्छेदकताः तावतीषु सर्वासु अवर्तमानधर्मेणाऽनवच्छिन्ना भवेत् । वह्नित्ववृत्तितावैशिष्ट्यं न यावत्यः प्रतियोगितावच्छेदकताः तावतीषु सर्वासु अवर्तमानम्, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तमानत्वात् । तथा च यावत्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधया वह्नित्ववृत्तितावैशिष्ट्यमपि धर्तुं न शक्यते, प्रतियोगितावच्छेदकतात्वोभयमपि धर्तुं न शक्यते, अतः तदवच्छिन्ना प्रतियोगिता यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्ना न कथ्यते, तदितरेणाऽनवच्छिन्ना (= प्रतियोगितावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यत्रितयभिन्नानवच्छिन्ना) हि महानसीयवह्न्यभावीयवह्नित्ववृत्तिताविशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना एव भवेत् । तादृशप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं तु अस्त्येवेति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः धर्तुं शक्यः भवेत्, वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयाऽवच्छेदकतारूपेण ग्राह्यत्वात्। तादृशमहानसीयवह्न्यभावाधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः।

यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वप्रवेशः पूर्वोक्तयुक्त्या (दृश्यतां पृ. २३०६) दूरतोऽपास्तः, तदपेक्षया यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्यैव लघुत्वात् ।

इत्थञ्च (१) प्रतियोगितावच्छेदकतात्वावच्छिन्नत्वस्य, (२) तद्व्यक्तित्वावच्छिन्नत्वस्य, (३) प्रतियोगितावच्छेदकतावृत्तिधर्मावच्छिन्नत्वस्य, (४) प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य, (५) यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मावच्छिन्नत्वस्य, (६) यावत्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य वा निवेशेऽपि पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादाय अन्यत्र वा लक्षणाऽसमन्वयाद् भवत्येवाऽव्याप्तिः । एवं (७) यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मावच्छिन्नत्वप्रवेशेऽपि स्वयं भाव्यम् । (८) यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वनिवेशोऽपि निरस्तः । अतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमेव निवेश्य 'यत्किञ्चित्-

य शो ल ता

साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमभ्युपेयम् ।

तथा च 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादाय अव्याप्तिः नैव सम्भवति, यतः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगित्वावच्छेदकतात्वत्रितयेनावच्छिन्ना, तत्र प्रतियोगित्वाऽवच्छेदकतात्वोभयं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि विद्यते, तथा च यावत्यः प्रतियोगितावच्छेदकताः विद्यन्ते तासु यस्यां कस्याञ्चिदपि प्रतियोगितावच्छेदकतायां प्रतियोगितावच्छेदकतात्वोभयस्याऽवर्तमानत्वाभावाद् यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यम् । किन्तु वह्नित्ववृत्तितावैशिष्ट्यं न तथा, यावत्यः प्रतियोगितावच्छेदकताः विद्यन्ते तासु यस्यां कस्याञ्चिदपि (= महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायाम्) वह्नित्ववृत्तितावैशिष्ट्यस्य अवर्तमानत्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकता(= महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता)ऽवृत्ति एव वह्नित्ववृत्तितावैशिष्ट्यं भवेत् ।

तेनाऽवच्छिन्ना हि वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना कथं भवेत् ? किन्तु तादृशी प्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्ना एव भवेत् । ततश्च वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वसत्त्वेऽपि तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिवह्नित्ववृत्तितावैशिष्ट्यधर्मेणाऽवच्छिन्नत्वेन तादृशप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वाऽसत्त्वात् तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते ।

य शो ल ता

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तस्यां यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वं वर्तते एव, यतः प्रतियोगित्वावच्छेदकतात्वोभयस्य महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि सत्त्वाद् वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि सत्त्वात् प्रकृताऽभावीयप्रतियोगितावच्छेदकतायाः एतदतिरिक्तायाः अभावाच्च यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधया प्रतियोगितावच्छेदकतात्वोभयं नैव धर्तुं शक्यते । तादृशप्रतियोगितावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना हि सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मेणाऽपि अनवच्छिन्ना एव भवेत् । किन्तु तादृशप्रतियोगिताश्रयमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नैव सम्भवति।

अतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वविरहात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते । य शो ल ता

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा तद्व्यक्तित्वेनाऽवच्छिन्ना, तद्व्यक्तित्वं वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तते एव, प्रकृताऽभावीयप्रतियोगितावच्छेदकताऽपि एकैव विद्यते इति नास्ति तादृशी प्रकृताऽभावीयप्रतियोगितावच्छेदकता यस्यां तद्व्यक्तित्वमवर्तमानं भवेदिति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया तद्व्यक्तित्वं नैव गृह्यते । तथा च तद्व्यक्तित्वेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना भवेदेव । तादृशप्रतियोगिताश्रयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-

पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मा-नवच्छिन्नप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । तथा च वह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नाऽ-व्याप्तिः, महानसीयवह्न्यभावस्याऽग्राह्यत्वादिति ।

'अत्र महानसीयवह्निः'- इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः नैव सम्भवति, यतः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मान-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वरूपमेव प्राप्यते, वह्न्यभावीयप्रतियोगितावच्छेदकंतावृत्तिप्रतियोगिता न महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्ना-नुयोगितानिरूपकपर्याप्तीया भवितुमर्हति, तादृशप्रतियोगिताश्रयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात्, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितायाः महानसीयत्व-वह्नित्वोभयपर्याप्तावच्छेदकतादौ एव सत्त्वात् । तथा च वह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यतद्व्यक्तित्वेनैवाऽवच्छिन्नत्वात्, तदितरेणाऽनवच्छिन्नत्वात् तादृशवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य वह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते, अतः वह्न्यभावोऽपि धर्तुं नैव शक्यते।

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता तस्याः महानसीयत्व-वह्नित्वोभयस्मिन् एव पर्याप्तत्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व

-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं स्यादेव, तादृशमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च प्रतियोगित्वेन अवच्छेदकतात्वेन चैव अवच्छिन्ना, नान्येन केनचित् । प्रतियोगितावच्छेदकतात्वोभयस्य च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि सत्त्वाद् वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि सत्त्वाच्च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यमेव प्रतियोगितावच्छेदकतात्वोभयम् । तथा च तादृशप्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मेणाऽनवच्छिन्ना तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना एव भवेत् । तथा च महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, अतः महानसीयवह्न्यभावो धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्न स्यादेव अव्याप्तिः ।

इत्थञ्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः तद्व्यक्तित्वावच्छिन्नत्वाङ्गीकर्तृमते लघुभूतं 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवं लक्षणं फलितम् ।

मूलकृतोपदर्शितञ्च लक्षणम् - 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः' इति फलितम् ।

मूढार्थ

अन्यथा तादृशरूपावच्छिन्नानुयोगिताकपर्य्याप्तीया या निरूपितत्व-सम्बन्धावच्छिन्नकिञ्चिन्निष्ठावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकता-भिन्नावच्छेदकत्वाऽनिरूपितप्रतियोगिता तदाश्रयावच्छेदकतानिरूपितत्वम्।

●

शब्दार्थश्च पूर्वं (दृश्यतां पृ. २१९८) सामान्येन दर्शितः, कठिनपरिष्कारशब्दार्थश्च अत्र दर्श्यते - **तादृशरूपावच्छिन्नानुयोगिताकपर्याप्तीया या निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठाऽ-**(प्रतियोगिता)**वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिता तदाश्रयाऽवच्छेदकतानिरूपितत्वम्**, अर्थात् स्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदक-धर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकतायामवृत्ति यद्रूपं तादृशरूपेण अवच्छिन्ना या अनुयोगिता तन्निरूपिका या पर्याप्तिः तयाऽवच्छिन्ना या प्रतियोगिता, किञ्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपिता या प्रतियोगिता, ततश्च तादृशरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तिसम्बन्धा-वच्छिन्ना निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता या प्रतियोगिता तदाश्रयविधया या अवच्छेदकता प्राप्यते तन्निरूपितत्वम् अभिप्रेताऽभावीयप्रतियोगितायां भवेत् तदा तादृशोऽभावः धर्तुं शक्यते इति भावः । यथा पर्वतो वह्निमान् धूमाद् - इत्यत्र स्वावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगितावच्छेदकधर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकतायामवृत्ति रूपं वह्नित्वगतैकत्वं

●

❀ લાંબો - લાંબો અર્થ ટૂંકા - ટૂંકા શબ્દોમાં ❀

शब्दार्थ :- (अन्यथा =) જો આવા લાંબા - લાંબા પરંપરાસંબંધોને તમે સ્વીકારતા ન હો તો રૂપવૃત્તિત્વ પ્રતિયોગિતામાં સ્વનિષ્ઠ-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદકત્વસંબંધથી લેવાને બદલે તાદશરૂપ(= સાધ્યતાઅવચ્છેદકતામાં અવૃત્તિ રૂપ)અવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય જે નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ (= કિંચિન્નિષ્ઠ. શબ્દતઃ પ્રતિયોગિતાનો ઉલ્લેખ કરવાની જરૂરત નથી. કિંચિત્થી પ્રતિયોગિતા જ લઈ શકાશે. સાધ્યતા વગેરે અન્ય કશું જ નહીં. જિજ્ઞાસુ કિંચિત્પદથી સાધ્યતાને લઈને લક્ષણસમન્વય કરવા પ્રયત્ન કરે. હકીકત સ્પષ્ટતયા સમજાઈ જશે.)-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિત પ્રતિયોગિતા તેના આશ્રયભૂત

एवञ्चानुपदोक्ताऽवृत्तित्वमपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति-धर्म्मानवच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वरूपं वाच्यम्।

तदवच्छिन्नानुयोगितानिरूपकपर्याप्तीया निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता या प्रतियोगिता तदाश्रयावच्छेदकताविधया वह्न्यभावीयप्रतियोगितावच्छेदकता गृह्यते, तन्निरूपितत्वं वह्न्यभावीयप्रतियोगितायां वर्तते इति वह्न्यभावः धर्तुं शक्यते ।

एवाञ्चाऽनुपदोक्ताऽवृत्तित्वमपि इति उक्तार्थम्, **यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वरूपं वाच्यम्**, अर्थाद् यत्किञ्चित्साध्यतावच्छेदकतायामपि अवर्तमानो यः तेन धर्मेणाऽनवच्छिन्ना या प्रतियोगिता तन्निरूपिका पर्याप्तिसम्बन्धावच्छिन्ना या अनुयोगिता तदवच्छेदकं यद्रूपं तत् 'तादृशरूप'पदेन पूर्वोक्तेन ग्राह्यमित्यर्थः । यथा 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया तद्व्यक्तित्वं न गृह्यते इति तद्व्यक्तित्वभिन्नधर्मानवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना भवत्येव, तादृशयत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता वह्नित्वे भवेत्, वह्नित्वे साध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन वर्तमानत्वात् तादृशानुयोगितायाः अवच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेदिति एतावता प्रबन्धेन 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-

જે અવચ્છેદકતા તન્નિરૂપિતત્વવિશિષ્ટપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ..... આ પ્રમાણે લક્ષણ થાય. આ પ્રમાણે પહેલા જે સ્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તિ-પ્રતિયોગિતાઅવચ્છેદકધર્મશૂન્યત્વસંબંધથી સાધ્યતાઅવચ્છેદકતામાં અવૃત્તિ રૂપથી..... ઈત્યાદિ જણાવેલ તેની જગ્યાએ હવે યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વવિશિષ્ટરૂપ..... ઈત્યાદિ સમજવું.

આખું લક્ષણ આ પ્રમાણે થશે કે - યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાવિશિષ્ટરૂપઅવચ્છિન્નઅનુયોગિતા-નિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદક-તાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણનિરૂપિતત્વવિશિષ્ટ-

वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणं फलितम् ।

अथ पूर्वं (दृश्यतां पृष्ठ-१७०५) निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः - इत्येवं लक्षणं प्रदर्शितम् आसीत् तदा 'एकं वह्नित्वम् अवच्छेदकम्'- इति प्रतीतेः प्रमात्वाङ्गीकारे निरूपितत्वसम्बन्धावच्छिन्नसाध्यत्वादिनिष्ठावच्छेदकतानिरूपितत्वादिरूपेण अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशः उभयत्र कृतः आसीत्, विस्मरणशीलविनेयानुग्रहार्थं लेशतः तद् दर्श्यते -

'एकं वह्नित्वम् अवच्छेदकम्'- इति प्रतीतिः यदि प्रमा तदा तत्र वह्नित्वे अवच्छेदकता भासते, सा अवच्छेदकता वह्नित्वे पर्याप्ता एवेति अवच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् । तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता केवलाऽ-वच्छेदकतात्वेनैवाऽवच्छिन्ना, सा अवच्छेदकता साध्यतायाः प्रतियोगितायाः वा ? इत्यनिर्देशात् तादृशाऽवच्छेदकतायां साध्यत्वं प्रतियोगित्वं वा निरूपितत्वसम्बन्धेन वर्तमानं नैव भवेदिति तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता निरूपितत्वसम्बन्धेन साध्यत्वेन प्रतियोगित्वेन वा अवच्छिन्ना नैव भवेत्, अतः अभिप्रेतावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वावच्छिन्ना एव भवेदिति अवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवेदेव।

●

પ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

•❋• પુનઃ અવ્યાપ્તિ આપાદન •❋•

(अव.) **પ્રશ્ન :-** ભાઈ સાહેબ ! તમે ગમે તેટલી મહેનત કરો. પણ, જ્યારે અવ્યાપ્તિ જ તમારા લલાટે લખાયેલી હોય તો તમારો પ્રયાસ સફળ કેવી રીતે થશે ? જુઓ, **'महानसीयवह्निः अत्र वर्तते' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वात्**

प्रकृते पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावः धर्तुं शक्यते, गुरुधर्मोऽपि प्रतियोगितावच्छेदको भवतीति मन्तव्यानुसारेण उक्तलक्षणं निर्मितमिति साध्यत्वेन अवच्छेदकतात्वेन चावच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता भवेदेव, साध्यतावच्छेदकतायाः वह्नित्वे पर्याप्तत्वात् साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं भवतीति निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात्। अत्र महानसीयवह्न्यभावः धर्तुमिष्यते, महानसीयवह्न्यभावीयप्रतियोगित्वम् अवच्छेदकतात्वं चैतद्धर्म-द्वितयाति-रिक्तसर्वधर्मानवच्छिन्नप्रतियोगितारूपेण 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारक-प्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते, अवच्छेदकतात्वातिरिक्तसर्वधर्मानव-च्छिन्नायाः अवच्छेदकतानिष्ठप्रतियोगितायाः प्रतियोगिताऽवच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्नत्व-ध्रौव्यात् । तादृशप्रतियोगिताश्रयावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् तादृशावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः निरूपितत्वसम्ब-न्धावच्छिन्न-तादृशमहानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकत्वसम्बन्धेन तादृशमहानसीयवह्न्यभावीयप्रतियोगिता वह्नित्वगतैकत्वरूपे वर्तमाना अस्त्येव। ततश्च निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्ना-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वे वर्तमानप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्य-भावस्य प्राप्तिः शक्या एव । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽ-

व्याप्तिः ।

एतदव्याप्तिनिराकरणाय अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं निवेश्यम्, तथा च महानसीय-वह्न्यभावीयप्रतियोगिताऽवच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्ना, अवच्छेदकतात्वन्यूनवृत्तिधर्मा-वच्छिन्ना च या प्रतियोगिता भवेत् सैव प्रतियोगिता प्रकृते ग्राह्या, 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छे-दकतात्वोभयातिरिक्तधर्मैरनवच्छिन्ना वर्तते, किन्तु अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना नास्ति, केवलावच्छेदकतात्वेनैवाऽवच्छिन्ना अवच्छेदकतात्वातिरिक्तधर्मानवच्छिन्ना च सा प्रतियोगिता अवच्छे-दकतात्वन्यूनवृत्तिधर्मैः कथमवच्छिन्ना भवेत् ? तथा च निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्य-भावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण अवच्छेदकतानिष्ठप्रतियोगितायाः ग्राह्यत्वेऽपि अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताविधया अग्राह्यत्वात् तादृशमहानसीयवह्न्यभावीय-प्रतियोगितानिष्ठनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियो-गितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रति-योगितारूपेण तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता नैव धर्तुं शक्यते । ततश्च न स्यादव्याप्तिरिति पूर्वोक्तरीत्या अनुसन्धेयम् ।

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय भवत्येव अव्याप्तिः, यतः 'एकं वह्नित्वम् अवच्छेदकम्'- इत्याकारक-प्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतात्वोभयातिरिक्तधर्मेणानवच्छिन्ना

- આ સ્થલમાં વહ્નિઅભાવને લઈને અવ્યાપ્તિ આવશે જ.

પહેલા તમે જણાવ્યું કે યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતા-નિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાવિશિષ્ટ મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વ છે, વહ્નિત્વ-ગતએકત્વ નથી. વહ્નિઅભાવીયપ્રતિયોગિતાનિરૂપક જે પ્રતિયોગિતાઅવચ્છેદકતા છે તેમાં રહેલી (૧) પર્યાપ્તીય - (૨) નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતા-ભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિત પ્રતિયોગિતા વહ્નિત્વ-ગતએકત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપક છે. મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્ન-અનુયોગિતાનિરૂપક નથી. એટલે કે વહ્નિઅભાવીયપ્રતિયોગિતામાં વહ્નિત્વગતએકત્વ-

एव वर्तते इति निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशावच्छेदकता-निष्ठप्रतियोगिता धर्तुं शक्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् ।

निरूपितत्वसम्बन्धावच्छिन्न-तादृशवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाव-च्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात् । ततश्च निरूपितत्वसम्बन्धावच्छिन्न -साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रति-योगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे निरू-पितत्वसम्बन्धाऽवच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छे-दकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्ति(प्रतियोगित्व)धर्मावच्छिन्नप्रतियो-गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वर्तमानप्रतियोगितानिरूपकाभाववविधया वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणासमन्वयान्न अव्याप्त्यभावः ।

●

અવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠઅવચ્છે-દકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઆશ્રય-નિરૂપિતત્વ જ રહેલું છે. મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપક-પર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વ-નિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણનિરૂપિતત્વ રહેલું નથી.

✳ વહ્ન્યભાવ લેવા માટેની મથામણ ✳

તેથી જો વહ્નિત્વગતએકત્વ યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વવિશિષ્ટ થાય તો જ વહ્નિઅભાવ લઈ શકાય. જો ફક્ત મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વ જ યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મ-અનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વવિશિષ્ટ થાય, વહ્નિત્વગત-એકત્વ યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-

यदि अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं निवेश्यते तदा 'एकं वह्नित्वम् अवच्छेदकम्' इत्याकारकप्रतीतौ भासमानावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, साध्यतावच्छेदकतात्वोभयधर्मातिरिक्तधर्मानवच्छिन्नत्वस्य तादृशावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशप्रतियोगितायाः धर्तुं शक्यत्वेऽपि अवच्छेदकतात्वन्यूनवृत्तिसाध्यत्वादिधर्मेण अवच्छिन्नत्वाभावेन अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशप्रतियोगितायाः धर्तुमशक्यत्वात् । ततश्च न स्यादेवाऽव्याप्तिरिति पूर्वोक्तरीत्या अनुसन्धेयम् ।

●

અનુયોગિતાઅવચ્છેદકત્વવિશિષ્ટ ન થાય તો વહ્નિઅભાવ લઈ ન શકાય.

-- વહ્નિત્વગતએકત્વ તો જ યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વથી વિશિષ્ટ થાય કે જો વહ્નિત્વમાં યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા રહે.

-- વહ્નિત્વમાં યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા તો જ રહે કે જો વહ્નિત્વમાં જ રહેનારી કોઈ પ્રતિયોગિતા યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિ ધર્મથી અનવચ્છિન્ન હોય.

યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મથી અનવચ્છિન્ન પ્રતિયોગિતા સામાન્યથી સાધ્યતાઅવચ્છેદકતામાં જ રહે છે અને વહ્નિત્વમાં તો પર્યાપ્તિસંબંધથી સાધ્યતાઅવચ્છેદકતા રહેતી નથી. માટે, વહ્નિત્વમાં રહેનારી કોઈ અવચ્છેદકતા સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાથી વિશિષ્ટ થતી નથી.

વહ્નિત્વમાં પર્યાપ્તિસંબંધથી સાધ્યતાઅવચ્છેદકતા રહેતી નથી. કારણ કે 'એક વહ્નિત્વ સાધ્યતાઅવચ્છેદક છે.' = **'एकं वह्नित्वं साध्यतावच्छेदकम्'** - આવા પ્રકારની પ્રતીતિ નથી થતી. જો 'એક વહ્નિત્વ સાધ્યતાઅવચ્છેદક છે' - આવા પ્રકારની પ્રતીતિ થતી હોય તો વહ્નિત્વમાં પર્યાપ્તિસંબંધથી સાધ્યતાઅવચ્છેદકતા રહી જાય અને વહ્નિત્વમાં સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા રહી જાય.

इत्थञ्च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वमुभयत्र निवेशनीयं तादृशलक्षणे इति भवता प्रतिपादितम् । किन्तु प्रकृतलक्षणे नोभयत्र तन्निवेशः आवश्यकः । तथा हि - अवच्छेदकतात्व-न्यूनवृत्तिधर्मावच्छिन्नत्वस्य प्रतियोगितावि‌शेषणकोटौ अनिवेशेऽपि पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः नास्त्येव, यतः प्रकृते यत्किञ्चित्साध्यतावच्छेदकता-ऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं विद्यते,

●

परंतु प्रस्तुतमां महानसीयवह्नि साध्य होवाथी 'महानसीयत्व अने वह्नित्व साध्यताअवच्छेदक छे' - आवा प्रकारनी ज प्रतीति थाय. माटे, महानसीयत्व अने वह्नित्व - उभयमां ज पर्याप्तिसंबंधथी प्रस्तुत साध्यताअवच्छेदकता रहे. आटली वात तो जाणे बराबर. पण हवे एक जूनी वात याद करो.

❀ केवल अवच्छेदकतानुं ग्रहण ❀

पूर्वे जणावेल के 'एक वह्नित्व साध्यताअवच्छेदक छे' - आवी प्रतीति नथी थती. पण, जो तमे 'एक वह्नित्व अवच्छेदक छे' - आवा प्रकारनी प्रतीतिने साची मानता हो तो एक वह्नित्वमां अवच्छेदकता (साध्यतानी के प्रतियोगितानी ? - कोई खुलासा/स्पष्टता विनानी) रही जाय. आ अवच्छेदकतामां जे प्रतियोगिता आवशे ते अवच्छेदकतात्वथी अवच्छिन्न होय. आ अवच्छेदकतात्व प्रतियोगिताअवच्छेदकतामां रहेल पण होई शके, साध्यताअवच्छेदकतामां रहेल पण होई शके, प्रकारताअवच्छेदकतामां रहेल पण होई शके. आथी, आ अवच्छेदकतात्व साध्यताअवच्छेदकता, प्रतियोगिताअवच्छेदकता, प्रकारता-अवच्छेदकता - आ बधी अवच्छेदकतामां रहेल छे. दुनियानी तमाम अवच्छेदकतामां पर्याप्तिसंबंधथी रहेनार आ अवच्छेदकतात्व छे.

'एक वह्नित्व अवच्छेदक छे' - आ वाक्यमां भासमान अवच्छेदकता तो दुनियानी अनेक अवच्छेदकतामांथी कोई पण अवच्छेदकता होई शके छे. माटे, वह्नित्वमां रहेनारी आ अवच्छेदकतामां रहेनारी प्रतियोगिता जे अवच्छेदकतात्वथी अवच्छिन्न छे ते अवच्छेदकतात्व दुनियानी तमाम अवच्छेदकतामां रहेल छे. कोई पण अवच्छेदकतामां न रहेल अवच्छेदकतात्व वह्नित्वनिष्ठतादृशअवच्छेदकतानिष्ठप्रतियोगितानुं अवच्छेदक न बनी शके.

आथी, आपणे एम कही शकीए के अवच्छेदकतात्व अवच्छेदकतामां व्यापक धर्म छे. तेनी अपेक्षाए साध्यताअवच्छेदकतात्व, प्रतियोगिताअवच्छेदकतात्व वगेरे धर्मो व्याप्य छे,

'एकं वह्नित्वम् अवच्छेदकम्'- इतिप्रतीतेः प्रामाणिकत्वे अवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत्, अतः वह्नित्वगतैकत्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता तादृशावच्छेदकतात्वावच्छिन्नाऽवच्छेदकतायां भवेत् । इयञ्च प्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, अवच्छेदकतात्वञ्च महानसीयवह्न्यभावीया या महान-सीयत्वनिष्ठप्रतियोगितावच्छेदकता या च वह्नित्वनिष्ठप्रतियोगितावच्छेदकता तत्रोभयस्मिन्नपि भवति इति यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधया अवच्छेदकतात्वं न गृह्यते, ततश्च केवलावच्छेदकतात्वेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना सा अवच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना वर्तते एव । इत्थञ्च अवच्छेदकतानिष्ठ-प्रतियोगितायाम् 'एकं वह्नित्वम् अवच्छेदकम्'- इत्याकारकप्रतीतौ भासमानायां यत्किञ्चित्-

न्यूनवृत्ति छे. मूળ वात ઉપર આવીએ - 'એક વહ્નિત્વ અવચ્છેદક છે' - આ પ્રતીતિસિદ્ધ વહ્નિત્વવૃત્તિઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા અવચ્છેદકતાત્વથી જ અવચ્છિન્ન છે. અવચ્છેદકતાત્વ સિવાયના તમામ ધર્મોથી અનવચ્છિન્ન છે. આ પ્રતિયોગિતા નિરૂપિતત્વસંબંધથી કોઈ પણ પ્રતિયોગિતાથી કે સાધ્યતાથી અવચ્છિન્ન નથી.

❋ अवच्छेदकतात्वअवच्छिन्न प्रतियोगिता ग्राह्य ❋

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता सा प्रतियोगित्वेन अवच्छेदकतात्वेन चावच्छिन्ना वर्तते इति अवच्छेदकतात्वन्यूनवृत्तिप्रतियोगित्वधर्मावच्छिन्नत्वस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां सत्त्वाद् अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, तत्र महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितावच्छेदकं यद् अवच्छेदकतात्वं तस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतायां सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेऽपि यत् प्रतियोगित्वं तस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि चाऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यमेवेति तदवच्छिन्ना हि सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्ना एव भवेत् ।

ततश्च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायाम् अवच्छेदक-

तात्वन्यूनवृत्तिधर्मावच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वाऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं नैव शक्यते ।

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचित् । तत्र साध्यत्वाऽवच्छेदकतात्वोभयमपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यम् । ततश्च तादृशसाध्यतावच्छेदकतात्वोभयेनैव अवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना भवेदेव । साध्यत्वञ्च पूर्वोक्तरीत्या अवच्छेदकतात्वन्यूनवृत्ति इति साध्यत्वावच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नाऽपि भवेदेव । ततश्च साध्यतावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्याऽपि सत्त्वाद् अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । तादृशप्रतियोगिताश्रयसाध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् न पर्याप्तत्वं किन्तु वह्नित्वे एव पर्याप्तत्वमिति साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेदिति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव भवेत् ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेनाऽवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचिदिति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । तादृशप्रतियोगित्वाऽवच्छेदकतात्वोभयञ्च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठ-प्रतियोगितावच्छेदकतायामपि वर्तते इति प्रतियोगित्वाऽवच्छेदकतात्वोभयं यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यम्, ततश्च प्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्ना सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना स्यादेव ।

किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया एव भवेत्, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया नैव भवेत् । तथा च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धाऽवच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण वा तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते । ततः उभयविधलक्षणानुसारेणाऽपि महानसीयवह्न्यभावः धर्तुं नैव शक्यते।

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता साऽपि प्रतियोगित्वेनाऽवच्छेदकतात्वेन (यद्वा तद्व्यक्तित्वेन) चैवाऽवच्छिन्ना, नान्येन केनचिदिति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । एवं प्रतियोगितावच्छेदकतात्वोभयं (यद्वा तद्व्यक्तित्वं) वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तमानमेवेति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यमिति प्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्ना हि सा वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव । या वह्न्यभावीयप्रतियोगितावच्छेदकता तस्याः वह्नित्वे एव पर्याप्तत्वात् तस्यां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता स्यादेव।

ततश्च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगिता-

य शो ल ता

वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्यापि च सत्त्वात्, यत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यापि सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगिताऽवच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेणाऽपि वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव ।

ततश्चोभयविधलक्षणानुसारेण वह्न्यभावः एव प्रकृते धर्तुं शक्यते, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिरिति अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं प्रवेश्य, (तदपि साध्यतावच्छेदकतानिष्ठप्रतियोगिताकोटौ एव प्रवेश्य) (१) यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवम्, (२) यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं वा लक्षणमभ्युपगन्तव्यम्। तदैव उक्ताऽव्याप्तिनिवारणं शक्यम् ।

अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्य पूर्वोक्तरीत्या उभयत्र निवेशावश्यकता नास्ति, केवलं पूर्वमेव तन्निवेशनीयमिति लाघवमपि अत्र वर्तते । तथा च परम्परासम्बन्धानभ्युपगमे तदभ्युपगमे वा उक्तलाघवार्थम् उक्तमेव लक्षणम् अङ्गीकार्यम् ।

य शो ला ता

गू *अवच्छेदकतात्वावच्छिन्नप्रतियोगितावारणाय*

अत्र शब्दार्थः एवम् - **अवच्छेदकतात्वावच्छिन्नप्रतियोगितावारणाय** = 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतात्वावच्छिन्नावच्छेदकतानिष्ठप्रतियोगिता 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, तद्वारणार्थम्, (तद्ग्रहणे =) तादृशप्रतियोगितायाः तद्रूपेण धारणे तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव स्यादिति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः, एतदव्याप्तिवारणार्थमिति यावत् ।

य शो ल ता

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, तद्वारणार्थम्, तादृशरीत्या तादृशप्रतियोगितायाः धर्तुं शक्यत्वे उक्तप्रतीतौ

❀ શબ્દ - અર્થ વચ્ચેનું જોડાણ કેન્દ્ર - શબ્દાર્થ ❀

શબ્દાર્થ :- અવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનું વારણ કરવા માટે = 'એક વહ્નિત્વ અવચ્છેદક છે' - આવા જ્ઞાનમાં ભાસમાન વહ્નિત્વનિષ્ઠઅવચ્છેદકતાવૃત્તિઅવચ્છેદકતાત્વ-અવચ્છિન્ન-પ્રતિયોગિતા યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મથી અનવચ્છિન્ન હોવાથી યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા-અવચ્છેદક રૂપ વહ્નિત્વગતએકત્વ થઈ જશે. પરિણામે, વહ્નિઅભાવ લઈ શકાતા અવ્યાપ્તિ આવી જશે, આ અવ્યાપ્તિના વારણ માટે યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મ-અનવચ્છિન્નપ્રતિયોગિતાને અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નત્વથી પણ વિશેષિત કરવી. મતલબ કે પ્રતિયોગિતાના બે વિશેષણ મૂકવા - (૧) યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિ-ધર્મઅનવચ્છિન્નત્વ, (૨) અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નત્વ. આ બે વિશેષણોથી

વિ ન ભા

चावच्छेदकतात्वन्यूनवृत्तिधर्म्मावच्छिन्नत्वेन प्रतियोगिता विशेषणीया ।

भासमानावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । ततश्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः धर्तुं शक्यः भवेत्, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयाद् अव्याप्तिः स्यात्, एतदव्याप्तिवारणाय इति यावत् ।

यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वनिवेशाऽपेक्षयाऽप्येवमेव बोध्यम्, तत्रापि 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया वह्न्यभावग्रहणसम्भवेन 'पर्वतो वह्निमान् धूमाद्'- इत्यत्र च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावग्रहणसम्भवेन चाऽव्याप्तिर्ध्रौव्यात् ।

इत्थञ्चैतदव्याप्तिवारणाय, **चः** पूर्वोक्तपरिष्कारसमुच्चये, **अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वेन** यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न**प्रतियोगिता विशेषणीया**, ततश्च यत्किञ्चित्-

વિશિષ્ટ પ્રતિયોગિતા જ લઈ શકાય. અવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા માત્ર અવચ્છેદકતાત્વથી જ અવચ્છિન્ન છે. આ અવચ્છેદકતાત્વ સાધ્યતાઅવચ્છેદકતામાં અવૃત્તિ ન હોવા છતાં પણ અવચ્છેદકતાત્વથી ન્યૂનવૃત્તિ તો છે જ નહીં. માટે, સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નપ્રતિયોગિતા તરીકે અવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા લઈ નહીં શકાય. શુદ્ધસાધ્યતાઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા જ લેવી પડશે. તાદૃશસાધ્યતા-

साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं वा लक्षणं फलितं भवति ।

ततश्च 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदंकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतावृत्तिप्रतियोगिता (यत्प्रतियोगिताग्रहणेन यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपक-

●

અવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વ જ થશે. તથા મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્નપ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણનિરૂપિતત્વથી વિશિષ્ટ મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા જ છે, વહ્નિઅભાવીયપ્રતિયોગિતા નથી. માટે, મહાનસીયવહ્નિઅભાવ જ લઈ શકાશે, વહ્નિઅભાવ લઈ નહીં શકાય. મહાનસીયવહ્નિઅભાવ તો તજ્જ્ઞાનમાં રહેતો નથી. તે તજ્જ્ઞાનભિન્ન જ્ઞાનમાં જ રહે, તજ્જ્ઞાનત્વહેતુ ત્યાં અવૃત્તિ. આ પ્રમાણે લક્ષણસમન્વય થઈ જવાથી અવ્યાપ્તિને કોઈ અવકાશ રહેતો નથી.

અત્યાર સુધીનું ફાઈનલ લક્ષણ -

યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મ-અવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપઅવચ્છિન્નઅનુયોગિતા-નિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઅધિકરણનિરૂપિત-પ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

पर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमभवत्, तादृशी सा प्रतियोगिता) यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते, तादृशप्रतियोगितायाः केवलावच्छेदकतात्वेनैवाऽवच्छिन्नत्वेन तदितरेण केनाऽपि अनवच्छिन्नत्वेन अवच्छेदकतात्वन्यूनवृत्तिधर्मानवच्छिन्नत्वात् । तथा च पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण ग्राह्यसाध्यतावच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वोभयधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया च वह्न्यभावः धर्तुं न शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः असम्भवात् ।

किन्तु महानसीयवह्न्यभावः एव धर्तव्यः, तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगित्वस्य सत्त्वात्, तादृशमहानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि । 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, तादृशप्रतियोगितायाः

अवच्छेदकतात्वेनैवाऽवच्छिन्नत्वेन, अवच्छेदकतात्वातिरिक्तधर्मेणाऽनवच्छिन्नत्वेन अवच्छेदकतात्वन्यून-वृत्तिधर्मानवच्छिन्नत्वात् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्व-न्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण ग्राह्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानव-च्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतै-कत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया (निरूपितत्वेत्यादिस्थाने यत्कि-ञ्चिदित्यादेः प्रवेशे) यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्ति-धर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकता-निरूपितप्रतियोगितानिरूपकाभावविधया च महानसीयवह्न्यभावः धर्तुं नैव शक्यते, महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्व-न्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्ना-नुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः असम्भवात् ।

किन्तु वह्न्यभावः एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः सत्त्वात्, वह्न्य-भावाधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिरिति यत्किञ्चित्साध्यताव-च्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशे नास्त्येवाऽव्याप्तिलेशोऽपि ।

अथ मूलकृता 'प्रतियोगिता विशेषणीया' इत्येवं सामान्येन एव निर्देशः कृतः, भवता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितायाः विशेषणविधया तन्निविष्टमिति सामान्याभिधानस्य विशेषपरत्वं भवता यदुपदर्शितं तत्र किं प्रमाणम् ? सामान्यनिर्देशस्य विशेषपरतायां प्रमाणस्य मृग्यत्वा***दिति चेत् ? न,*** तादृशपरिष्कारप्रयोजनाऽसिद्धेरेव प्रमाणत्वात् ।

तथा हि - यदि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वमनिवेश्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताविशेषणविधया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया वा तन्निवेशमभ्युपेत्य - यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं वा लक्षणमभ्युपगम्यते तदा 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादाय चाऽव्याप्तिः तदवस्था एव भवेत्।

तथा हि - 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतावृत्तिप्रतियोगिता पूर्वोक्तरीत्या 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वं भवेदेव । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव, तादृशप्रतियोगिता च प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचिदिति तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता भवेदेव। तत्र प्रतियोगित्वमवच्छेदकतात्वन्यूनवृत्तिधर्मः इति तादृशप्रतियोगित्वावच्छिन्ना वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-

प्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नाऽपि वर्तते एव ।

एवं तादृशप्रतियोगितावच्छेदकतात्वोभयस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वात् (तादृशोभयस्य वह्न्यभावीयप्रतियोगितावच्छेदकतायां सत्त्वात्) तादृशप्रतियोगितावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना तदितरेणाऽनवच्छिन्ना वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव । ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य, अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । अतः वह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

य शो ल ता

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्रापि महानसीयवह्न्यभावमादायाऽव्याप्तिः भवेदेव, यतः 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यावच्छेदकतात्वेतरधर्माऽनवच्छिन्नत्वात् तादृशावच्छेदकतानिष्ठप्रतियोगितायाः । तथा च पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, तादृशप्रतीतौ अवभासमानावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूप-

विधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः ।

महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् । तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैव अवच्छिन्ना, नान्येन केनचिदिति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । प्रतियोगितावच्छेदकतात्वोभयं महानसीयत्व-निष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, उभय-प्रतियोगितावच्छेदकतातिरिक्तप्रतियोगितावच्छेदकतायाः असत्त्वात् तादृशप्रतियोगितावच्छेद-कतात्वोभयं यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यम् ।

ततश्च तादृशप्रतियोगितावच्छेदकतात्वोभयेतरधर्मानवच्छिन्ना सा महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव । तत्र प्रतियोगित्वमवच्छेदकतात्वापेक्षया न्यूनवृत्तिधर्मः इति प्रतियोगित्वावच्छिन्ना सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नाऽपि स्यादेव । ततश्च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां (१) यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहान-सीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, (२) निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितत्वस्य, (३) यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य, (४) अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मा-नवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छि-न्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्व-न्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रति-

य शो ल ता

योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्न-प्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, अतः महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

इत्थञ्च यदव्याप्तिनिवारणाय अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं निवेश्यते तन्निवारणं निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताविशेषणविधया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया वा तन्निवेशे नैव सम्भवति, अतः उक्तापत्तिवारणाय यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया एव तन्निवेशनीयम् । उभयत्राऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशम् अभ्युपेत्य 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितावच्छेदकताऽनिरूपितावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं 'यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमभ्युपगम्यते तदा निरर्थकं गौरवम्, पूर्वोक्तरीत्या निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताविशेषणविधया यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया वा अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वाप्रवेशेऽपि आपत्तिविरहात् । ततश्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताविशेषणविधया एवाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं निवेशनीयमिति भावः ।

य शो ल ता

अथ अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं किमर्थं प्रवेश्यते ? एकत्र अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वनिवेशेनैवोपपत्तौ तादृशगुरुतरपरिष्काराश्रयणस्याऽयोग्यत्वात् । तथा चैवं लक्षणम् अङ्गीकर्तव्यम् - यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वप्रवेशाङ्गीकर्तृमतेऽपि एवमेव लक्षणम् - यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः नैव भवेत्, एतल्लक्षणानुसारेण । 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता तु अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचित् । ततश्च अवच्छेदकतात्वस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि सत्त्वात्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि सत्त्वात्, एतदतिरिक्तसाध्यतावच्छेदकतायाः असत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अवच्छेदकतात्वं नैव गृह्यते इति अवच्छेदकतात्वेनैवाऽवच्छिन्ना अवच्छेदकतात्वेतरेणाऽनवच्छिन्ना च सा अवच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव । किन्तु सा प्रतियोगिता अवच्छेदकतात्वेतरेणाऽनवच्छिन्ना इति तस्याम् अवच्छेदकतात्वातिरिक्तधर्मानवच्छिन्नत्वम् = अवच्छेदकतात्वेतरधर्मानवच्छिन्नत्वं कथं स्यात् ?

तथा च अवच्छेदकतानिष्ठतादृशप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि अवच्छेदकतात्वातिरिक्तधर्मावच्छिन्नत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्ताऽवच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते, किन्तु पूर्वोक्तरीत्या साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तव्या, यदि वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता ध्रियते तदा सा प्रतियोगित्वेनावच्छेदकतात्वेन

चावच्छिन्ना इति अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वं तादृशप्रतियोगितायां वर्तते एव । तत्रावच्छेदकतात्वं महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि अस्ति, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि अस्ति इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यमवच्छेदकतात्वम्, किन्तु यत् प्रतियोगित्वं तद् वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि न वर्तते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि न विद्यते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति एव तत्, तेनावच्छिन्ना हि सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्ना एव स्यात्, न तु अनवच्छिन्ना इति वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाम् अवच्छेदकतात्वातिरिक्तप्रतियोगित्वावच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वाऽसत्त्वात् तादृशप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते । एवम् अवच्छेदकतात्वातिरिक्तसाध्यत्वादिनाऽवच्छिन्ना वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिताऽपि अवच्छेदकतात्वातिरिक्तावच्छिन्ना भवति, किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकताऽवृत्तिवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्ना सा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना न भवतीति वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते ।

किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव ग्राह्या, सा साध्यत्वेनाऽवच्छेदकतात्वेन चाऽवच्छिन्ना, साध्यत्वावच्छेदकतात्वोभयञ्च पूर्वोक्तरीत्या महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया साध्यतावच्छेदकतात्वोभयं नैव गृह्यते । ततश्च साध्यतावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना स्यादेव । साध्यत्वमवच्छेदकतात्वातिरिक्तमिति साध्यत्वावच्छिन्ना सा प्रतियोगिता अवच्छेदकतात्वाऽतिरिक्तावच्छिन्ना स्यादेवेति तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते । तादृशप्रतियोगिताश्रयसाध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना-

वच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्व-गतद्वित्वमेव भवेत् ।

तथा च पूर्वोक्तरीत्या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते इति वह्न्यभावोऽपि नैव धर्तुं शक्यते ।

किन्तु पूर्वोक्तरीत्या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वात् तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्य-

भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ? एवमुभयविध-लक्षणानुसारेणाऽपि अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वमप्रवेश्य अवच्छेदकतात्वातिरिक्ता-वच्छिन्नत्वप्रवेशेनाऽपि उपपत्तिः सम्भवत्येव ।

यथाऽत्र नाऽभवदव्याप्तिः तथैव पर्वतो वह्निमान् धूमाद् - इत्यत्रापि न स्यादेव अव्याप्तिः, 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ अवभासमानाऽवच्छेदकतावृत्तिप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचिदिति अवच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदक-ताऽवृत्तिधर्मविधयाऽग्राह्यत्वाद् अवच्छेदकतात्वभिन्नेनाऽनवच्छिन्ना सा प्रतियोगिता यत्किञ्चित्साध्य-तावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना भवति, किन्तु यतः सा प्रतियोगिता अवच्छेदकतात्वातिरिक्तेनाऽव-च्छिन्ना नास्ति ततः सा अवच्छेदकतात्वातिरिक्तावच्छिन्ना न भवेदिति यत्किञ्चित्साध्यतावच्छेदक-त्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशप्रतियोगिता धर्तुं नैव शक्यते, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि तादृशाऽवच्छेदकतानिष्ठ-प्रतियोगितायामवच्छेदकतात्वाऽतिरिक्तावच्छिन्नत्वाभावात् । महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिताऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वाति-रिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, तादृशप्रतियोगितायाम् अवच्छेदकतात्वातिरिक्त-प्रतियोगिताऽवच्छिन्नत्वसत्त्वेनाऽवच्छेदकतात्वातिरिक्तावच्छिन्नत्वसम्भवेऽपि यत्किञ्चित्साध्यतावा-च्छेदकत्वाऽवृत्तिप्रतियोगित्वेनाऽवच्छिन्नत्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य असत्त्वात् ।

किन्तु या साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना सा एव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकता-त्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, साध्यतावच्छेदकतात्वोभयस्य यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेन तदवच्छिन्नायां तस्यां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तसाध्यतावच्छिन्नत्वेन अवच्छेदकतात्वातिरिक्तधर्मा-वच्छिन्नत्वस्य च सत्त्वात् । तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वा-

तिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव भवेत्, न महानसीयत्व-वह्नित्वगतद्वित्वम् ।

ततश्च पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्ता-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयत्वस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामसत्त्वाद् निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय -निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽ-वृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रति-योगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते इति महानसीयवह्न्यभावोऽपि धर्तुं नैव शक्यते ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मान-वच्छिन्नावच्छेदकतात्वातिरिक्ताऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छे-दकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्कि-ञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतै-कत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता-रूपेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चि-

त्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते ।

तादृशप्रतियोगिताश्रयावच्छेदकतायाः वह्न्यभावीयप्रतियोगितानिरूपकत्वाद् वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तित्वाभावेन लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः । इत्थञ्चोभयविधलक्षणानुसारेणाऽपि अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वप्रवेशेनैव सामञ्जस्ये निरर्थकमेवाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशः इति सहृदयानां सुप्रतीतम् ।

ननु अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वप्रवेशे पूर्वोक्ताऽव्याप्तिद्वितयं न निराकृतं भवति । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनाऽवच्छिन्ना, अवच्छेदकतात्वं पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यमिति तदितरानवच्छिन्ना सा प्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव । किञ्च, सा प्रतियोगिता अवच्छेदकतात्वातिरिक्तेनाऽनवच्छिन्ना इत्यपि कथयितुं न शक्यते, यतः अवच्छेदकतायाः पर्याप्तिसम्बन्धेन अधिकरणविधया वह्नित्वस्य विवक्षितत्वाद् अवच्छेदकतानिष्ठप्रतियोगिता पर्याप्तिसम्बन्धेनाऽवच्छिन्ना भवेदेव, न हि केवलाऽनुयोगिता एव पर्याप्तिसम्बन्धेनाऽवच्छिन्ना भवेत्, प्रतियोगिताऽनुयोगितोभयस्याऽपि पर्याप्तिसम्बन्धेन अवच्छिन्नत्वात्, यथा संयोगेन घटस्य भूतलवृत्तितायां घटनिष्ठप्रतियोगिताऽपि भूतलनिष्ठानुयोगिताऽपि च संयोगसम्बन्धावच्छिन्ना भवति ।

तथा च अवच्छेदकतानिष्ठप्रतियोगिता न केवलावच्छेदकतात्वेनैवाऽवच्छिन्ना, किन्तु पर्याप्तिसम्बन्धेनाऽपि अवच्छिन्ना भवति इति अवच्छेदकतात्वातिरिक्तपर्याप्तिसम्बन्धावच्छिन्नत्वं तादृशावच्छेदकतानिष्ठप्रतियोगितायां वर्तते एव । तथा च 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वमपि वर्तते, अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वमपि विद्यते इति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः वह्नित्वनिष्ठायाः अवच्छेदकं रूपं वह्नित्वगतैकत्वमेव विद्यते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वा-

तिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव ।

ततश्च वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव, ततश्च वह्न्यभावोऽपि धर्तुं शक्यते एव, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणासमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्येण अवच्छिन्ना इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव, अवच्छेदकतात्वातिरिक्तेन पर्याप्तिसम्बन्धेनाऽवच्छिन्ना सा अवच्छेदकतात्वातिरिक्ताऽवच्छिन्ना भवेदेवेति तादृशावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं प्राप्यते एव।

य शो ल ता

ततश्च महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगत-द्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकता-त्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रति-योगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । ततश्च महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः । इत्थञ्च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वाऽप्रवेशे अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वमात्रप्रवेशेऽपि भवत्येव अव्याप्तिः इति प्रवेष्टव्यमेव अवच्छे-दकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वम् ।

य शो ल ता

न च अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वमात्रमेव न निवेशितमस्माभिः लक्षणे, किन्तु यत्किञ्चि-त्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमपि निवेशितम् । अवच्छेदकतानिष्ठप्रतियोगिता 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमाना 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्येतत्स्थले अवच्छेदकतात्वेन पर्याप्ति-सम्बन्धेन चावच्छिन्ना, अत्र अवच्छेदकतात्वं महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽ-ग्राह्यम्, किन्तु पर्याप्तिस्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि नास्ति, वह्नित्वनिष्ठसाध्यता-वच्छेदकतायामपि नास्ति इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया गृह्यते । तादृश-पर्याप्तिसम्बन्धेनाऽवच्छिन्ना साऽवच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-

धर्मावच्छिन्ना एव भवेत् । तथा च तादृशाऽवच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वाऽसत्त्वाद् अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते ।

किन्तु पूर्वोक्तरीत्या साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, साध्यतावच्छेदकतात्वोभयातिरिक्तानवच्छिन्नायां तदुभयेनैवाऽवच्छिन्नायां तस्यां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्याऽवच्छेदकतात्वातिरिक्ताऽवच्छिन्नत्वस्य च सत्त्वात् । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमिति यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । तथा च वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां पूर्वोक्तरीत्या निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाद् महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगिता-

वच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेव अव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्राऽपि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेन पर्याप्तिसम्बन्धेन चाऽवच्छिन्ना भवेत्, तत्र अवच्छेदकतात्वातिरिक्तपर्याप्तिसम्बन्धावच्छिन्नत्वस्य अवच्छेदकता-निष्ठप्रतियोगितायां सत्त्वाद् अवच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तु तादृशप्रतियोगिता धर्तुं शक्यते एव, किन्तु अवच्छेदकतात्वस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतायां सत्त्वेन यत्किञ्चि-त्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेऽपि तादृशपर्याप्तिसम्बन्धस्य वह्नित्वनिष्ठसाध्यता-वच्छेदकतायामसत्त्वात् तादृशपर्याप्तिसम्बन्धः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यः एव, ततश्च तदवच्छिन्ना अवच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति-(पर्याप्ति)धर्मावच्छिन्ना एव भवेत् । ततश्च तादृशाऽवच्छेदकतानिष्ठप्रतियोगितायां अवच्छेदकता-त्वातिरिक्तावच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते ।

किन्तु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्येण अवच्छेदकतात्वेन साध्यत्वेन अवच्छेदकतात्वातिरिक्तेन चावच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्ताऽवच्छिन्नप्रतियो-गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव भवेत् । तथा च महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छे-

दकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य असत्त्वात्, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां तु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते, किन्तु वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते इति महानसीयवह्न्यभावो नैव धर्तुं शक्यते, किन्तु वह्न्यभावः एव ग्राह्यः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ? एवमवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वमप्रवेश्यावच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्यैव प्रवेशेऽपि, उभयस्थलेऽपि, उभयलक्षणानुसारेणाऽपि नास्त्येव अव्याप्तिः ।

यत्तु "अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वप्रवेशेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वपरिष्कारेणोक्ताऽऽऽपत्तिनिरासकल्पना दिवास्वप्नतुल्या, यतः अव्याप्तिनिरासः वस्तुतः नैव भवति । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता गृह्यते, तादृशप्रतियोगिता अवच्छेदकतात्वेन पर्याप्तिसम्बन्धेन चाऽवच्छिन्ना, तत्र अवच्छेदकतात्वस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्च

वर्तमानतया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यत्वं निर्विवादम् । महानसीयत्व-निष्ठसाध्यतावच्छेदकतायाः वह्नित्वनिष्ठसाध्यतावच्छेदकतायाश्च पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन् सत्त्वेन तादृशसाध्यतावच्छेदकताद्वितयस्मिन् पर्याप्तिसम्बन्धस्य सत्त्वेऽपि 'एकं वह्नित्वमवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानवह्नित्वपर्याप्तिविशिष्टावच्छेदकतानिष्ठपर्याप्ति-सम्बन्धस्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि न विद्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकता-यामपि न विद्यते, तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता तु तादृशपर्याप्तिसम्बन्धेनाऽ-वच्छिन्ना एव वर्तते, तथापि तादृशप्रतियोगिता यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मावच्छिन्ना तु नैव भवेत्, यतः पर्याप्तिः सम्बन्धः वर्तते, न धर्मः, तथा च यत्किञ्चित्साध्यतावच्छेदकताऽ-वृत्तित्वस्य तादृशपर्याप्तौ सत्त्वेऽपि धर्मत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिपर्याप्ति-सम्बन्धस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यत्वमेव । तथा च पर्याप्तिसम्बन्धः अवच्छेदकतात्वञ्चोभयमपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यमेव । तथा च तदुभयेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना सा अवच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव । अवच्छेदकतात्वाऽतिरिक्तपर्याप्ति-सम्बन्धावच्छिन्नत्वेन सा अवच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वातिरिक्तावच्छिन्ना वर्तते एव ।

तथा चावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य चोभयस्य सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशप्रतियोगिता धर्तुं शक्यते, तादृश-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमिति यत्किञ्चित्साध्यताव-च्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव ।

ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगितायां पूर्वोक्तरीत्या निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चि-त्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना-

य शो ल ता

वच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति वह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे तज्ज्ञानत्वहेतुः वृत्तिरिति लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्राऽपि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्येण अवच्छेदकतात्वेन, तदतिरिक्तेन पर्याप्तिसम्बन्धेन चावच्छिन्ना इति तादृशप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । ततश्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्ताऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवेत् । अतः पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्ताऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावोऽपि धर्तुं शक्यते एव, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्व-

यात् स्यादेवाऽव्याप्तिरिति अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वाऽप्रवेशे अवच्छेदकतात्वातिरिक्ताऽवच्छिन्नत्वप्रवेशे स्यादेवाऽव्याप्तिः" ***इति,***

तन्न, पर्याप्तेः धर्मत्वाऽनपायात् । अयं भावः - यदा "वह्नित्वपर्याप्तिविशिष्टा 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ प्रतिभासमानाऽवच्छेदकता" - इत्युच्यते तदा पर्याप्तिः धर्मविधया भासते एवेति न पर्याप्तिः धर्मविधया न गृह्यते । यथा सम्बन्धोऽपि संयोगः 'भूतलं घटसंयोगि' - इत्यादौ धर्मत्वं भजते एव तथा सम्बन्धरूपाऽपि पर्याप्तिः नैकान्तेन धर्मरूपा । किञ्च, असम्बद्धस्य सम्बन्धत्वाऽसम्भवाद् यत्सम्बद्धत्वं तद्धर्मत्वं सम्बन्धे स्यादेवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया पर्याप्तिः धर्तुं शक्यते एव, 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च पर्याप्तिसम्बन्धस्य धर्मविधयाऽपि ग्राह्यस्य असत्त्वात् । असम्बद्धस्य सम्बन्धत्वाऽयोगात् पर्याप्तेः धर्मरूपत्वमपि अङ्गीकार्यमेवेति तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता पर्याप्तिसम्बन्धावच्छिन्ना अवच्छेदकतात्वावच्छिन्ना च अवच्छेदकतात्वातिरिक्तावच्छिन्ना भवति, किन्तु यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना न भवति, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यपर्याप्तिसम्बन्धेनाऽवच्छिन्नत्वात् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते ।

किन्तु पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्येण अवच्छेदकतात्वेन तदितरेण साध्यत्वेन च अवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽपि भवेत्, अवच्छेदकतात्वातिरिक्तावच्छिन्नाऽपि भवेत् । तथा च महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपक-साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः एव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्ताऽवच्छिन्नप्रतियोगितारूपेण धर्तव्यत्वात् पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण

य शो ल ता

यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय -यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते, किन्तु महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता एव धर्तव्या । तथा च महानसीयवह्न्यभावः एव धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारक-प्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मानवच्छिन्ना नास्ति, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यपर्याप्तिसम्बन्धेनाऽनवच्छिन्नत्वाभावात् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियो-गितारूपेण तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते । किन्तु यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्येण अवच्छेदकतात्वेन, तदतिरिक्तेन साध्यत्वेन चावच्छिन्ना साध्यता-वच्छेदकतानिष्ठप्रतियोगिता, यत्प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वं भवति सैव, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्ताऽवच्छिन्न-प्रतियोगितारूपेण धर्तुं शक्यते ।

अतः पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्ता-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिताऽवच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वा-ऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, न महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, तथा च महानसीयवह्न्यभावः नैव ग्राह्यः, वह्न्यभावः एव ग्राह्यः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्ति-तया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः । तथा चावच्छेदकतात्वातिरिक्तावच्छिन्नत्वप्रवेशेऽपि नास्त्येवाऽव्याप्तिः ।

य शो ल ता

स्यादाशङ्का - ननु एवमव्याप्तिनिवारणे तु असम्भवः एव स्यात्, तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता यथा पर्याप्तिसम्बन्धेनाऽवच्छिन्ना, पर्याप्तेश्च धर्मरूपत्वाऽनपायाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नाऽभवत् तथैव या साध्यतावच्छेदकतानिष्ठप्रतियोगिता साऽपि पर्याप्तिसम्बन्धेनैवाऽवच्छिन्ना, तादृशप्रतियोगितानिरूपकानुयोगितायाः पर्याप्तिसम्बन्धाऽवच्छिन्नत्वात्, तथा च पर्याप्तिसम्बन्धस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यत्वेन तादृशपर्याप्तिसम्बन्धावच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्ना एव भवेत् । यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिताऽपि धर्तुं न शक्यते एव । ततः का प्रतियोगिता तादृशी प्राप्यते या प्रतियोगिता पर्याप्तिसम्बन्धानवच्छिन्ना, अत एव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण ग्राह्या भवेत् ? तादृशप्रतियोगितानिरूपकानुयोगितायाः पर्याप्तिसम्बन्धावच्छिन्नत्वस्यावश्यकत्वात् । तथा च सर्वत्र लक्षणाऽसमन्वयात् स्यादेवाऽसम्भवः ***इति,***

तन्न; यतः 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायाः यत्पर्याप्तिसम्बन्धेनाऽवच्छिन्नत्वं न हि तेनैव सम्बन्धेन 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र साध्यतावच्छेदकतानिष्ठप्रतियोगिता अवच्छिन्ना, येन तादृशपर्याप्तिसम्बन्धस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यत्वे तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकपर्याप्तिसम्बन्धस्याऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यत्वम् । महानसीयत्व-वह्नित्वोभयस्मिन् येन पर्याप्तिसम्बन्धेन अवच्छेदकता वर्तते तेन सम्बन्धेन साध्यतावच्छेदकता कथम् एकस्मिन् वह्नित्वे एव भवेत् ? तथा च तादृशपर्याप्तिसम्बन्धः अवच्छेदकतायां वर्तमानः नैव साध्यतावच्छेदकतायां वर्तते, किन्तु साध्यतावच्छेदकता येन पर्याप्तिसम्बन्धेन वह्नित्वे वर्तते, सः पर्याप्तिसम्बन्धस्तु साध्यतावच्छेदकतायां वर्तते एवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया तादृशपर्याप्तिसम्बन्धः नैव गृह्यते इति तादृशपर्याप्तिसम्बन्धावच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेवेति पूर्वोक्तरीत्या सर्वत्र लक्षणसमन्वयः ***इति वाच्यम्,***

यतः, न हि पर्याप्तिसम्बन्धः संयोगवद् द्विष्ठः येन साध्यतावच्छेदकता येन सम्बन्धेन वह्नित्वे वर्तते सोऽपि सम्बन्धः साध्यतावच्छेदकतायां स्यात्, संयोगः अनुयोगिनि अपि भवेत्, प्रतियोगिनि अपि भवेत्, किन्तु समवायः अनुयोगिनि एव स्वरूपेण भवेत्, प्रतियोगिनि नैव। यथा हि समवायो न द्विष्ठः तथा पर्याप्तिरपि न द्विष्ठा, तथा च पर्याप्तिसम्बन्धः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यः एवेति पूर्वोक्तरीत्या स्यादेवाऽसम्भवः ।

न च तादृशपर्याप्तिसम्बन्धस्य स्वप्रतियोगित्वसम्बन्धेन साध्यतावच्छेदकतायां वर्तमानत्वान्न यत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मविधया पर्याप्तिसम्बन्धस्य ग्राह्यत्व***मिति वाच्यम्,*** एवं सति 'एकं वह्नित्वम् अवच्छेदकम्' इत्यादिप्रतीतौ भासमानाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदक-पर्याप्तिसम्बन्धस्याऽपि कालिकादिसम्बन्धेन साध्यतावच्छेदकतायां वृत्तित्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया तादृशपर्याप्तिसम्बन्धस्याऽपि अग्राह्यत्वात् । तथा च पूर्वोक्तरीत्याऽव्याप्तिः दुर्वारा एव भवेत्, न हि स्वप्रतियोगित्वसम्बन्धेन साध्यतावच्छेदकतायां वर्तमानं साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यम्, इतरद् ग्राह्यमित्यत्र किमपि नियामकम् । अतः त्यक्तव्या एषा कल्पना । किन्तु अङ्गीकर्तव्यमेतत् -

"यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मेण धर्मविधया अनवच्छिन्ना अवच्छेदकतात्वातिरिक्ता-वच्छिन्ना च या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपित-प्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवं लक्षणम्, "यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिना धर्मविधया अनवच्छिन्ना अवच्छेदकतात्वातिरिक्तावच्छिन्ना च या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छे-दकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरण-निरूपितवृत्तित्वाभावः" - इत्येवं वा लक्षणम् । ततश्च न स्यादुक्ताऽऽपत्तिः । तथा हि -

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र साध्यतावच्छेदकतानिष्ठा प्रतियोगिता धर्मविधया साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, साध्यत्वावच्छेदकतात्वोभयमपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते एव, वह्नित्वनिष्ठसाध्यतावच्छेदकतातिरिक्तसाध्यतावच्छेदकतायाः अभावात् साध्यताव-

य शो ल ता

च्छेदकतात्वोभयमपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति नैव भवेत् । यः पर्याप्तिसम्बन्धः तस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यत्वेऽपि तेन च साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छिन्नत्वेऽपि तादृशपर्याप्तिसम्बन्धेन धर्मविधया तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अनवच्छिन्नत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मेण धर्मविधया अनवच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वातिरिक्तेन साध्यत्वेनाऽपि अवच्छिन्ना इति तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते ।

तादृशसाध्यतावच्छेदकतायाः वह्नित्वे पर्याप्तत्वेन तन्निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधयाऽपि वह्नित्वगतैकत्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव प्राप्यते । तथा च पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपत्वसम्भवात् तादृशप्रतियोगितायाः तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां अवृत्तेश्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, न महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता । तथा च वह्न्यभावः एव धर्तुं शक्यते, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयः स्यादेव (आपाततः इदम्) ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्न्यभावमादाय लक्षणाऽसमन्वयः न स्यात् पूर्वोक्तरीत्या, यतः

साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना वर्तते, साध्यत्वावच्छेदकतात्वोभयेतरेण धर्मविधयाऽवच्छिन्ना नास्ति । साध्यतावच्छेदकतात्वोभयञ्च महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, ततश्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यं साध्यत्वावच्छेदकतात्वोभयम् । साध्यत्वावच्छेदकतात्वोभयातिरिक्तेन पर्याप्तिसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्येण अवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता वर्तते, किन्तु तेनाऽपि धर्मविधया अवच्छिन्ना नास्ति ।

तथा च येन (= साध्यत्वावच्छेदकतात्वोभयेन) धर्मविधया अवच्छिन्ना वर्तते तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता, तत् (= साध्यतावच्छेदकतात्वोभयम्) यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यं नास्ति, यत् (= पर्याप्तिसम्बन्धादिकम्) यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यमस्ति तेन तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः सम्बन्धविधया अवच्छिन्नत्वसम्भवेऽपि धर्मविधया नितान्तमनवच्छिन्नत्वम् । तथा च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । एवं साध्यतावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वातिरिक्तेन साध्यत्वेनाऽपि अवच्छिन्ना वर्तते इति साध्यतावच्छेदकतानिष्ठप्रतियोगितायां (साध्यत्वलक्षणेन धर्मेण) अवच्छेदकतात्वातिरिक्तेनाऽवच्छिन्नत्वमप्यस्ति । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

तथा च पूर्वोक्तरीत्या महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वाच्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकता-

य शो ल ता

त्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैवेति उभयविधलक्षणानुसारेण महानसीयवह्न्यभावः एव धर्तुं शक्यः स्यात्, न तु वह्न्यभावः । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयः सम्भवत्येव ।

तथा चोक्ताऽऽपत्तिनिराकरणाय भवता 'धर्मविधया' इत्यस्य निवेशः लक्षणेऽवश्यं कर्तव्यः इति निश्चीयते । हन्त ! एवञ्च उभयस्थलेऽपि अवच्छेदकतानिष्ठप्रतियोगितायाः धर्तुं शक्यत्वेन उभयविधलक्षणाऽनुसारेणाऽव्याप्तिः दुर्निवारा एव स्यात् । तथा हि -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, यतः तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वेनाऽवच्छिन्ना वर्तते, अवच्छेदकतात्वञ्च महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते । तथा चावच्छेदकतात्वन्तु यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यम् । यः पर्याप्तिसम्बन्धः तस्य साध्यतावच्छेदकतायामवृत्तित्वेऽपि तेनावच्छिन्ना अवच्छेदकतानिष्ठा प्रतियोगिता धर्मविधया न पर्याप्तिसम्बन्धेनाऽवच्छिन्ना इति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नप्रतियोगितारूपेण अवच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । तादृशावच्छेदकतानिष्ठप्रतियोगिता चाऽवच्छेदकतात्वेन, तदतिरिक्तेन पर्याप्तिसम्बन्धेनाऽपि अवच्छिन्ना इति अवच्छेदकतानिष्ठप्रतियोगितायाम् अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वमपि वर्तते ।

ततश्चाऽवच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानव-

च्छिन्नत्वस्य, अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तथा च तादृशाऽवच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् ।

ततश्च वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावि‌शिष्ट-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तितादृशप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । ततश्चोभयलक्षणानुसारेणाऽपि वह्न्यभावः धर्तुं शक्यते । तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वेन पर्याप्तिसम्बन्धेन च सम्बन्धविधया अवच्छिन्ना वर्तते । तत्र अवच्छेदकतात्वं वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया तदग्राह्यम्, पर्याप्तिसम्बन्धः न

वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते इति सः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यः, किन्तु अवच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वेनैवाऽवच्छिन्ना वर्तते, न पर्याप्तिसम्बन्धेन इति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नत्वन्तु अवच्छेदकता-निष्ठप्रतियोगितायां वर्तते एव । अवच्छेदकतात्वातिरिक्तपर्याप्तिसम्बन्धावच्छिन्नायां तस्यामवच्छेदकता-निष्ठप्रतियोगितायाम् अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वमप्यवश्यं स्यादेव ।

तथा चावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनव-च्छिन्नत्वस्यावच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदक-ताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानव-च्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । ततश्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्या-प्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगिता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यन-वच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकता-त्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियो-गितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावः उभयविधलक्षणानुसारेण ग्राह्यः स्यादेव । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

य शो ल ता

ततश्चावच्छेदकतात्वातिरिक्तावच्छिन्नत्वप्रवेशे उक्तरीत्या अव्याप्तिनिवारणं नैव शक्यम्, अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वमवश्यं निवेशनीयम्, तन्निवेशे तु न स्यादेवोक्तरीत्या अव्याप्तिः इति ।

न च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशेऽपि अव्याप्तिनिवारणं नैव शक्यम् । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वेन, सम्बन्धविधया च पर्याप्तिसम्बन्धेन अवच्छिन्ना वर्तते । अत्राऽपि उक्ताऽऽपत्तेः समानत्वाद् 'धर्मविधया' - इत्यस्य निवेशमङ्गीकृत्य 'धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवम्, 'धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमङ्गीकार्यम्, तथा च तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव, धर्मविधया तादृशप्रतियोगिता येन अवच्छिन्ना तस्यावच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वात्, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधया ग्राह्येण येनाऽवच्छिन्ना तस्य पर्याप्तिसम्बन्धस्य धर्मविधया तादृशप्रतियोगितावच्छेदकत्वाभावाच्च ।

एषः पर्याप्तिसम्बन्धः वह्नित्वे एव स्यात्, उक्तावच्छेदकतापर्याप्तेः वह्नित्वे एव सत्त्वात्, अवच्छेदकतात्वञ्च तदपेक्षया बहुषु स्थानेषु वर्तते इति अवच्छेदकतात्वापेक्षया पर्याप्तिसम्बन्धः न्यूनवृत्तिः एव भवेत्, पर्याप्तिसम्बन्धस्य च धर्मरूपताऽपि अनाविला पूर्वोक्तरीत्या इति अवच्छेदकतात्वन्यूनवृत्तिधर्मविधया पर्याप्तिसम्बन्धः धर्तुं शक्यते एव, तथा च तेनाऽवच्छिन्ना अवच्छेदकतात्वनिष्ठप्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना स्यादेव । इत्थञ्च तादृशावच्छेदकतानिष्ठप्रति-

योगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नत्वस्य (अवच्छेदकतात्वातिरिक्ता-वच्छिन्नत्ववत्) अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकता-निष्ठप्रतियोगिता धर्तुं शक्यते एव । तथा च पूर्वोक्तरीत्या एतादृशावच्छेदकतानिष्ठप्रतियोगितानिरू-पकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपमपि वह्नित्वगतैकत्वमेव स्यात् ।

ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां पूर्वोक्तरीत्या धर्मविधया यत्कि-ञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मा-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रति-योगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चि-त्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगिता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रति-योगिता धर्तुं शक्यते इति वह्न्यभावोऽपि धर्तुं शक्यते । वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र 'महानसीयत्व-वह्नित्वे द्वे अवच्छेदके' - इत्याकारक-प्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिताऽपि अवच्छेदकतात्वेन धर्मविधया, पर्याप्तिसम्बन्धेन च सम्बन्धविधया अवच्छिन्ना वर्तते इति पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मेण धर्मविधया अनवच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव,

येन तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छिन्ना तस्य अवच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्यत्वात्, यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधया ग्राह्येण येन प्रकृतप्रतियोगिता अवच्छिन्ना तेन धर्मविधया तादृशप्रतियोगितायाः अनवच्छिन्नत्वाच्च ।

अत्र यः पर्याप्तिसम्बन्धः वर्तते सः महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तते, तादृशप्रतीतौ भासमानावच्छेदकतापर्याप्तेः महानसीयत्व-वह्नित्वोभयस्मिन्नेव सत्त्वात् । अवच्छेदकतात्वञ्च तदपेक्षया साध्यतावच्छेदकतादिषु बहुषु वर्तते इति अवच्छेदकतात्वं पर्याप्तिसम्बन्धापेक्षयाऽधिकदेशवृत्ति, पर्याप्तिसम्बन्धः अवच्छेदकतात्वापेक्षया न्यूनवृत्तिरिति पर्याप्तिसम्बन्धावच्छिन्ना तादृशावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना कथ्यते एव, ततश्च तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तादृशाऽवच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

इत्थञ्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपि-तत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मा-

य शो ल ता

वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावः धर्तुं शक्यते । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः । तथा चाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशेऽपि न निस्तारः ।

न च पर्याप्तिसम्बन्धस्य अवच्छेदकतात्वन्यूनवृत्तित्वमेव न सम्भवति, यतः पर्याप्तिसम्बन्धः 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ वह्नित्वे वर्तते, अवच्छेदकतात्वञ्च साध्यतावच्छेदकतादिषु वर्तते इति अवच्छेदकतात्व-पर्याप्तिसम्बन्धयोः सामानाधिकरण्यस्याऽपि असम्भवे कथं न्यूनाधिकदेशवृत्तित्वं सम्भवति ? न्यूनवृत्तिधर्मः यत्र यत्र वर्तते तत्र तत्र यद् वर्तते ततोऽपि अधिकदेशेषु च यद् वर्तते तदेव अधिकदेशवृत्ति कथ्यते, पर्याप्तिसम्बन्धः यत्र यत्र-(= वह्नित्वे) वर्तते तत्र तत्र अवच्छेदकतात्वं नैव वर्तते, ततः कथं पर्याप्त्यपेक्षया तस्य अधिकदेशवृत्तित्वं कथ्यमानं शोभते ? एवञ्च पर्याप्तिसम्बन्धेनाऽवच्छिन्नायामपि तादृशाऽवच्छेदकतानिष्ठप्रतियोगितायाम् अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं नैव सम्भवति, अवच्छेदकतात्वातिरिक्ताऽवच्छिन्नत्वं सम्भवति, पर्याप्तेः अवच्छेदकतात्वातिरिक्तत्वे विवादाभावात् ।

तथा च 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वमवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायामवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वासत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्तुं नैव शक्यते । या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, तत्र निरूपितत्वसम्बन्धेन साध्यत्वं साध्यतावच्छेदकतायां वर्तते, तत्र तु अवच्छेदकतात्वं वर्तते एव, तदतिरिक्तप्रतियोगितावच्छेदकतादिषु अपि वर्तते, साध्यत्वाधिकरणसामान्येषु वर्तमानत्वे सति तदधिकदेशवृत्तिधर्मः एवाधिकदेशवृत्तिः साध्यत्वापेक्षया इति अवच्छेदकतात्वं साध्यत्वापेक्षया अधिकदेशवृत्ति भवेदेवेति अवच्छेदकतात्वापेक्षया साध्यत्वं न्यूनदेशवृत्ति भवेदेव । तथा च तादृशसाध्यत्वेनावच्छिन्ना प्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना भवेदेव ।

अवच्छेदकतात्वस्य साध्यत्वस्य चोभयसाध्यतावच्छेदकतायां वर्तमानतया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्येण साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्ना स्यादेव, धर्मविधया तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य साध्यत्वावच्छेदकतात्वोभयस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वात्, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यस्य साध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य पर्याप्तिसम्बन्धस्य धर्मविधया तादृशप्रतियोगिताऽनवच्छेदकत्वाच्च ।

तथा च तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नत्वस्य अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । ततश्च पूर्वोक्तरीत्या साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । अतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः सम्भवात्, वह्न्यभावीयप्रतियोगितावच्छेदकतायामसम्भवाच्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैवेति महानसीयवह्न्यभावः एव धर्तुं शक्यते, न वह्न्यभावः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेन पर्याप्तिसम्बन्धेन चावच्छिन्ना, तत्र अवच्छेदकतात्वं महानसीयत्व-वह्नित्वादौ न स्यात्, अपि तु तन्निष्ठसाध्यतावच्छेदकतादिषु वर्तते, पर्याप्तिसम्बन्धश्च महानसीयत्व-वह्नित्वादौ वर्तते इति अवच्छेदकतात्व-पर्याप्तिसम्बन्धयोश्च सामानाधिकरण्यस्याऽप्यसम्भवे न्यूनवृत्तित्वं तु सुतरां नैव सम्भवेत् । अतः धर्मविधया यत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य अवच्छेदकतानिष्ठ-प्रतियोगितायां सत्त्वेऽपि अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्याऽसत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठप्रतियोगिता ग्रहीतुं न शक्यते । किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिसाध्यत्वावच्छेदकतात्वोभयेनैव यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति-धर्मविधयाऽग्राह्येण धर्मविधयाऽवच्छिन्नेति साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । ततश्च पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत्, न महानसीयत्व-वह्नित्वगतद्वित्वम् ।

ततश्च पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्व-न्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चि-त्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगिता नैवेति वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणाऽसमन्वयान्न स्यादेवाऽव्याप्ति***रिति वाच्यम्;***

न्यूनवृत्तित्वस्य तादृशार्थाभ्युपगमे व्याप्यत्वरूपत्वापत्तेः । अयमाशयः - न्यूनवृत्तित्वं नाम अल्पदेशवृत्तित्वम्, अल्पकालवृत्तित्वं वा । देशतः कालतश्च व्याप्यत्वमेतदतिरिक्तमेव, धूमः वह्न्यपेक्षया न्यूनदेशवृत्तिः, व्याप्यश्च एवं पृथ्वीत्वमपि द्रव्यत्वापेक्षया न्यूनदेशवृत्ति व्याप्यञ्च, किन्तु द्रव्यत्वाऽपेक्षया नीलत्वस्य न्यूनवृत्तित्वं समाम्नातम्, न व्याप्यत्वम्, सामानाधिकरण्ये सति अपि, असत्यपि च न्यूनवृत्तित्वं सम्भवति, न व्याप्यत्वम्, व्याप्यधर्मः न्यूनवृत्तिः स्यादेव, न्यूनवृत्तिधर्मः व्याप्यः स्यादपि, न स्यादपि । किन्तु उक्तरीत्या न्यूनवृत्तित्वस्याऽर्थाभ्युपगमे न्यूनवृत्ति-व्याप्यवृत्तिधर्मयोः कोऽपि विशेषः एव न सञ्जायते । किञ्च, त्रिविधाः धर्माः - (१) न्यूनवृत्तिधर्माः, (२) अधिकवृत्तिधर्माः, (३) समानवृत्तिधर्माः । एतेषु त्रिषु सर्वेषां धर्माणां समवतारः भवतीति स्पष्टमेव । अवच्छेदकतात्वाऽपेक्षया पर्याप्तिसम्बन्धस्य न्यूनवृत्तिधर्मत्वाऽनङ्गीकारे अधिकवृत्तित्वं समानवृत्तित्वं वाऽभ्युपगन्तव्यं स्यादिति महदसामञ्जस्यम् । क्वचिन्न्यूनवृत्तित्वस्य व्याप्यत्वसमानार्थकतया प्रयोगदर्शनेऽपि अत्र तदर्थकप्रयोगाभ्युपगमे व्याप्यत्वलक्षणे व्याप्यत्वप्रवेशेन तन्निर्वचनस्य अन्योन्याश्रयग्रस्तत्वादशक्यत्वमेव स्यात्, अतः असमानाधिकरणयोरपि धर्मयोः न्यूनाधिकदेशवृत्तित्वं सम्भवतीति अङ्गीकार्यमेवेति विभावनीयं कोविदैः अत्रत्यं तत्त्वम् ।

तथा च 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठ-प्रतियोगितायाः अवच्छेदकतात्वन्यूनवृत्तिपर्याप्तिसम्बन्धावच्छिन्नत्वं स्यादेव । तथा च पूर्वोक्तरीत्या तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते इति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव । अतः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीय-

य शो ल ता

प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयाद् उभयविधलक्षणानुसारेण स्यादेवाऽव्याप्तिः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिताऽपि अवच्छेदकतात्वन्यूनवृत्तिपर्याप्तिसम्बन्धावच्छिन्नत्वाद् अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव, तथा च पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण ग्राह्यतादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावः धर्तव्यः, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिरिति अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशेऽपि अव्याप्तिनिवारणं नैव शक्य***मिति वाच्यम्,***

धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशे तन्निवारणसम्भवात् । तथा चैवं लक्षणम् - धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना धर्मविधया च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति, यद्वा धर्मविधया यत्किञ्चित्साध्यता-

वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना धर्मविधया च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणमङ्गीकार्यम् ।

तथा सति नोक्ताऽव्याप्त्यापत्तिः । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधयाऽवच्छेदकतात्वेनैवाऽवच्छिन्ना वर्तते, पर्याप्तिसम्बन्धेन तु सम्बन्धविधया अवच्छिन्ना, न धर्मविधया । तथा च धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिना केनाऽपि धर्मेण तादृशावच्छेदकतानिष्ठप्रतियोगिता अनवच्छिन्ना एव वर्तते । अतः धर्मविधया तादृशावच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य अवच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेन तादृशाऽवच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि अवच्छेदकतात्वन्यूनवृत्तिधर्मेण धर्मविधयाऽवच्छिन्नत्वं नास्ति, धर्मविधया तादृशावच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य अवच्छेदकतात्वस्य अवच्छेदकतात्वन्यूनवृत्तित्वाऽसम्भवात्, अवच्छेदकतात्वन्यूनवृत्तिपर्याप्तिसम्बन्धस्य तादृशावच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य धर्मविधया तादृशप्रतियोगितावच्छेदकत्वासम्भवाच्च ।

तथा च तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य सत्त्वेऽपि धर्मविधयाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वाऽसत्त्वात् तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण (अत्र 'धर्मविधया' इत्यस्य अवृत्तिधर्मानवच्छिन्नत्वे न्यूनवृत्तिधर्मावच्छिन्नत्वे च उभयत्राऽन्वयः कर्तव्यः) तादृशाऽवच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते । किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिना धर्मविधयाऽनवच्छिन्ना, अवच्छेदकतात्वन्यूनवृत्तिधर्मेण धर्मविधया अवच्छिन्ना च भवेत्, यतः साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया साध्यतावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, नान्येन केनचिदिति साध्यतावच्छेदकतात्वोभयस्य यत्किञ्चित्साध्यतावच्छेदकतायामवृत्तित्वाभावात्तादृशप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं स्यादेव । साध्यत्वमव-

च्छेदकतात्वापेक्षया न्यूनवृत्ति, अवच्छेदकतात्वाधिकरणे प्रतियोगितावच्छेदकतादौ साध्यत्वस्याऽसत्त्वात्, साध्यतावच्छेदकतायामेव (निरूपितत्वसम्बन्धेन) तस्य सत्त्वात्, अत एव साध्यत्वाधिकरणसङ्ख्यायाः अवच्छेदकतात्वाधिकरणसङ्ख्यापेक्षया न्यूनत्वाच्च । तथा च धर्मविधया साध्यत्वेन अवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वन्यूनवृत्तिधर्मेण धर्मविधयाऽवच्छिन्ना एव कथ्यते, न तु अनवच्छिन्ना इति साध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधयाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं स्यादेव ।

तथा च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते । साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपञ्च महानसीयत्व-वह्नित्वगतद्वित्वमेवाऽस्ति । अतः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

य शो ल ता

ततश्च पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते इति महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि 'महानसीयत्व-वह्नित्वे द्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैव धर्मविधयाऽवच्छिन्ना, पर्याप्तिसम्बन्धेन सम्बन्धविधया एवाऽवच्छिन्ना, न धर्मविधया, तथा च तादृशावच्छेदकतानिष्ठ-प्रतियोगितायां धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं न सम्भवति, धर्मविधया तादृशा-वच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य अवच्छेदकतात्वस्य अवच्छेदकतात्वन्यूनवृत्तित्वाऽभावात्, अवच्छेदकतात्वन्यूनवृत्तेः तादृशावच्छेदकतानिष्ठप्रतियोगितावच्छेदकस्य पर्याप्तिसम्बन्धस्य धर्म-विधया अवच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकत्वाभावाच्च । ततश्च अवच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेन धर्मविधयाऽवच्छेदकतात्वेनैवाऽवच्छिन्नायां तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मान-वच्छिन्नत्वसत्त्वेऽपि धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वाऽसत्त्वाद् धर्मविधया यत्किञ्चि-त्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण अवच्छेदकता-निष्ठप्रतियोगितायाः ग्रहणमशक्यमेव ।

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता तस्याः धर्मविधया साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वात्, साध्यत्वस्य अवच्छेदकतात्वन्यूनवृत्तित्वात्, साध्यत्वावच्छेदकतात्वोभयस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तित्वाभावाच्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्ति-धर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते । साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्व-गतैकत्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यनवच्छिन्ना धर्मविधया अवच्छेद-कतात्वन्यूनवृत्त्यवच्छिन्ना च या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतै-कत्वमेव भवेत्, न महानसीयत्व-वह्नित्वगतद्वित्वम् ।

ततश्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्ति-धर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वाद् महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतायामसत्त्वाच्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्त्यन-वच्छिन्नाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-

गतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगितारूपेण, धर्मविधया यत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिधर्मेण अनवच्छिन्ना, धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मेणाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्ति-धर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैवेति महानसीयवह्न्यभावः नैव धर्तुं शक्यते, वह्न्यभावः एव ग्राह्यः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ? इत्थञ्च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशे नास्त्यापत्तिः, किन्तु अवच्छेदकतात्वातिरिक्तधर्मावच्छिन्नत्वप्रवेशे आपत्तिरस्त्येवेति चेत् ?

य शो ल ता

न, अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशेऽपि आपत्तिनिवारणं यथा धर्मविधया इत्यस्य प्रवेशेनैव सञ्जातम्, तथैव अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वप्रवेशेऽपि सम्भवात् । तथा हि - 'धर्मविधया' इत्यस्य प्रवेशपूर्वकं लक्षणमेवमवगन्तव्यम् - धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मेण अनवच्छिन्ना, अवच्छेदकतात्वातिरिक्तधर्मेण धर्मविधया अवच्छिन्ना च या प्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः इति, धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वा-तिरिक्तधर्मावच्छिन्न(धर्मविधयेति पदमुभयत्राऽन्वेयम्)प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छे-दकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्न-प्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं वा लक्षणम् । तदनुसारेण न स्यादेव पूर्वोक्ताऽऽपत्तिः, तद्यथा - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकता-त्वेनैवाऽवच्छिन्ना, सम्बन्धविधया च पर्याप्तिसम्बन्धेनाऽवच्छिन्ना, ततश्च अवच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यस्यैव (अवच्छेदकतात्वस्य महानसीयत्वनिष्ठ-

साध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानत्वात्) धर्मविधया तादृशप्रतियोगितावच्छेदकत्वात्, तादृशप्रतियोगितावच्छेदकस्य पर्याप्तिसम्बन्धस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यस्य धर्मविधया तादृशप्रतियोगितानवच्छेदकत्वाच्च तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं स्यादेव।

किन्तु तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वेनैवावच्छिन्ना वर्तते, अवच्छेदकतात्वातिरिक्तेन न केनाऽपि, अवच्छेदकतात्वातिरिक्तपर्याप्तिसम्बन्धेनाऽपि सम्बन्धविधया एवावच्छिन्ना वर्तते, न धर्मविधया इति तादृशावच्छेदकतानिष्ठप्रतियोगितायामवच्छेदकतात्वातिरिक्तावच्छिन्नत्वसम्भवेऽपि धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वं नैव सम्भवति । तथा च तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वसत्त्वेऽपि धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वाऽसत्त्वात् तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते । किन्तु या साध्यतावच्छेदकतानिष्ठप्रतियोगिता वर्तते तस्याः साध्यत्वावच्छेदकतात्वोभयेनैव धर्मविधयाऽवच्छिन्नत्वमिति साध्यत्वावच्छेदकतात्वोभयस्य पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधयाऽग्राह्यत्वेन तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं स्यादेव । साध्यत्वमवच्छेदकतात्वातिरिक्तम्, ततश्च धर्मविधया तेनावच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्ना स्यादेव ।

इत्थञ्च साध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते, प्रकृतसाध्यतावच्छेदकतायाः पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् । तथा च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

य शो ल ता

यदि 'एकं वह्नित्वमवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्या भवेत्, तदा तादृशावच्छेदकतायाः वह्नित्वे पर्याप्तत्वेन तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वं स्यात्, किन्तु तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, तादृशप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव पूर्वोक्तरीत्या ग्राह्या इति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं नैव प्राप्यते, महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते ।

य
शो
ल
ता

ततश्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वात्, वह्न्यभावीयप्रतियोगितावच्छेदकतायामसम्भवाच्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव ग्रहीतुं शक्यते, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैवेति महानसीयवह्न्यभावः एव ग्रहीतुं शक्यते, न वह्न्यभावः इति महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वेनैवाऽवच्छिन्ना, पर्याप्तिसम्बन्धेन तु सम्बन्धविधया अवच्छिन्ना इति तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वं नैव स्यादिति अवच्छेदकतात्वस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमानत्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यस्यैव धर्मविधया तादृशावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकत्वात्, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यपर्याप्त्यादिना धर्मविधया तादृशावच्छेदकतानिष्ठप्रतियोगितायाः अनवच्छिन्नत्वाच्च तादृशावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य सत्त्वेऽपि धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वाऽसत्त्वात् तादृशावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, अतः तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्य प्राप्तौ अपि धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं नैव भवेत् ।

प्रकृते साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, यतः तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया साध्यत्वेन तदतिरिक्तेन च अवच्छेदकतात्वेनैवाऽवच्छिन्ना, तत्र साध्यत्वावच्छेदकतात्वोभयमपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया साध्यत्वावच्छेदकतात्वोभयं नैव धर्तव्यम् । साध्यत्वावच्छेदकतात्वोभयातिरिक्तानवच्छिन्ना हि सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्ना भवेदेव । तथा पूर्वोक्तरीत्या साध्यत्वमवच्छेदकतात्वातिरिक्तमिति अवच्छेदकतात्वातिरिक्तेन साध्यत्वेन अवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्ना भवेदेव। तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य धर्मविधया अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वस्य च सत्त्वात् तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते ।

य शो ल ता

तादृशसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं नास्ति, किन्तु वह्नित्वगतैकत्व-मेवाऽस्तीति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वातिरिक्ताव-च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात्, न महानसीयत्व -वह्नित्वगतद्वित्वम् ।

ततश्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्ति-धर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरू-पकपर्याप्तीयप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वात्, महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतायामसत्त्वाद् धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना-वच्छेदकतात्वातिरिक्तावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेद-कताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता-रूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वातिरिक्ता-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वावृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, तादृशमहानसीयवह्न्यभावीयप्रतियो-गितावच्छेदकतावृत्तिप्रतियोगिता नैवेति वह्न्यभावः एव धर्तुं शक्यते, न महानसीयवह्न्यभावः । वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नाऽव्याप्तिः ।

इत्थञ्चाऽवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वापेक्षया लघुभूतस्य अवच्छेदकतात्वातिरिक्ता-वच्छिन्नत्वस्य प्रवेशेऽपि सर्वसामञ्जस्ये निरर्थकमेव खलु अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्व-पर्यन्तमनुधावनम् ? किमर्थं हि ऋजुपथपरित्यागपूर्वकं वक्रपथाश्रयणमाद्रियते सहृदयैः भवद्भिः ?

किञ्च अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वप्रवेशेऽपि अव्याप्तिराक्षसी न भवत्प्राणप्रियं लक्षणं जातु उज्झितुमिच्छति । तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र 'द्वे महानसीयत्व -वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्न-

प्रतियोगितारूपेण धर्तुं शक्या नाऽभवदिति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्त्यनवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं नाऽभवत् । एतत्स्थले अव्याप्तिदानार्थं महानसीयवह्न्यभावः धर्तव्यः, महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वञ्च वर्तते, किन्तु तस्यां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमेव वर्तते, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं न वर्तते इति यदि धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवेत् तदैव महानसीयवह्न्यभावः धर्तुं शक्यते, तदैव च अव्याप्तिः स्यात् ।

या महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयनिष्ठप्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, यतः महानसीयत्व-निष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयं पर्याप्तिसम्बन्धेन कुत्र स्यादिति पर्यनुयोगे महानसीयत्व-वह्नित्वोभयमेव पर्याप्तिसम्बन्धेन महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्याधिकरणं भवेदिति उत्तरितव्यम् । ततश्च महानसीयत्वनिष्ठ-प्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयं यदि आधेयं तदा पर्याप्तिसम्बन्धेन तदाधारं महानसीयत्व-वह्नित्वोभयमेवेति भावः, तथा च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव स्यात्, अतः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभय-वृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् ।

महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्त्युभयत्वेनैव अवच्छिन्ना, तादृशोभयत्वातिरिक्तेन धर्मविधया न केनाऽप्यवच्छिन्ना, एतच्चोभयत्वं महानसीयत्वनिष्ठप्रतियोगिता-वच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते, एतदुभयत्वं पर्याप्तिसम्बन्धेन

य शो ला ता

महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन्नेव भवेत्, स्वरूपेण तु महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तते । तथा च वह्नित्वनिष्ठसाध्यतावच्छेदकतायामवृत्तिधर्मविधया तादृशोभयत्वं न गृह्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमानत्वादेव । प्रकृतस्थले वह्नित्वनिष्ठसाध्यतावच्छेदकताऽतिरिक्ता नास्ति साध्यतावच्छेदकता इति तादृशोभयत्वं यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया नैव गृह्यते, ततश्च धर्मविधया तादृशोभयत्वातिरिक्तेनाऽनवच्छिन्ना महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यता-वच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव ।

तथा तादृशोभयत्वम् अवच्छेदकतात्वन्यूनवृत्ति, अवच्छेदकतात्वस्य महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतादिषु बहुषु वर्तमानत्वात्, तदपेक्षया तादृशोभयत्वस्य महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव च सत्त्वात् । तथा च तादृशोभयत्वेन अवच्छेदकतात्वन्यूनवृत्तिना धर्मविधया अवच्छिन्ना सा महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना स्यादेव । तथा च तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वं वर्तते, धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वमपि वर्तते इति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं शक्यते। तादृशप्रतियोगिताश्रयावच्छेदकताविधया महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयं गृह्यते, तादृशोभयस्य महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यादिति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

ततश्च पूर्वोक्तरीत्या महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रति-

योगितायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वाच्च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः न सम्भवति, यतः वह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव सम्भवतीति यदि धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं भवेत् तदैव धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्तीययत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगता धर्तुं शक्या भवेत्, तदैव च वह्न्यभावः धर्तुं शक्यते ।

किन्तु प्रकृतस्थले पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवति, वह्नित्वगतैकत्वं नैव, यतः वह्नित्वनिष्ठसाध्यतावच्छेदकतानिष्ठप्रतियोगिता-

य शो ल ता

निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं भवेत्, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतादि-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वं भवेत्, तत्र वह्नित्व-निष्ठसाध्यतावच्छेदकतानिष्ठा वह्नित्वनिष्ठप्रतियोगितावच्छेदकतादिनिष्ठा वा प्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, तादृशप्रतियोगितायाः यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिवह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगित्वादिना अवच्छिन्नत्वात् । तथा च धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मान-वच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-गतैकत्वं नैव भवेदिति वह्न्यभावोऽपि धर्तुं नैव शक्यः स्यात्, ततः कुतः तमादायाऽव्याप्तिः ?

परन्तु तादृशस्थले सर्वथाऽव्याप्तिः नैव भवतीति न, तार्णमहानसीयवह्न्यभावमादायाऽव्याप्तेः सम्भवात् । तथा हि - तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता पर्याप्तिसम्बन्धेन तार्णत्वे महानसीयत्वे वह्नित्वे च भवेदिति तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमेव स्यात्, न महानसी-यत्व-वह्नित्वगतद्वित्वम्, न वा वह्नित्वगतैकत्वम्, अर्थात् तादृशतार्णमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतायां तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगिता एव भवेत्, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वा नैव भवेत् । महानसीयत्व-वह्नित्वोभयवृत्तितावैशिष्ट्यतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितासत्त्वेऽपि तादृशप्रति-योगितायाः तार्णत्वनिष्ठप्रतियोगितावच्छेदकतायामवृत्ति-प्रतियोगित्वावच्छेदकतात्वातिरिक्तमहानसीयत्व-वह्नित्वोभयवृत्तितावैशिष्ट्यावच्छिन्नत्वात् तादृशतार्णमहानसीयवह्न्यभावीयमहानसीयत्व-वह्नित्वोभय-वृत्तितावैशिष्ट्यप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना च नैव भवेत् ।

ततश्च या प्रतियोगिता महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयाऽपि भवेत्, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-

य शो ल ता

प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नाऽपि च भवेत्, तादृशी प्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, अर्थात् तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां महानसीयत्व-वह्नित्वगत-द्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेद-कताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदक-त्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता च नैव स्याताम्, किन्तु तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वा-ऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता चैव तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्याताम्।

तथा च यदि धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यून-वृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगत-त्रित्वं स्यात् तदैव तार्णमहानसीयवह्न्यभावो धर्तुं शक्यो भवेत् । या साध्यतावच्छेदकतानिष्ठप्रति-योगिता तस्याः धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिसाध्यत्वावच्छेदकतात्वोभयेन यत्किञ्चित्साध्यता-वच्छेदकत्वाऽवृत्तिधर्मविधयाऽग्राह्येण अवच्छिन्नत्वात् तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रति-योगितारूपेण धर्तुं शक्यते, किन्तु तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छि-न्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः ग्रहणे धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, न तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमिति तार्णमहानसीयवह्न्यभावोऽपि धर्तुं न शक्यते ।

ततश्च यत्प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगत-त्रित्वं वर्तते, तादृशप्रतियोगितायाः धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नाव-

च्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण ग्रहणसम्भवे एव धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं स्यात् । या तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं भवति, किन्तु तादृशप्रतियोगिता प्रतियोगित्वेन महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्च अवृत्तिधर्मेणाऽवच्छिन्ना इति सा यत्किञ्चित्साध्यताऽवच्छेदकताऽवृत्तिना धर्मविधया अनवच्छिन्ना नैव स्यादिति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते ।

या तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयनिष्ठप्रतियोगिता तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमेव स्यात्, तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयं पर्याप्तिसम्बन्धेन कुत्र भवेत् ? - इत्येवं पर्यनुयोगे तार्णत्व-महानसीयत्व-वह्नित्वत्रितयस्यैव वक्तव्यत्वात् । तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तित्रितयत्वेनैवाऽवच्छिन्ना । एतत्त्रितयत्वं तार्णत्वनिष्ठप्रतियोगितावच्छेदकतायां महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्च वर्तते । तथा च तादृशत्रितयत्वस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानत्वात्, एतदतिरिक्तसाध्यतावच्छेदकतायाः असत्त्वाच्च यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मविधया तादृशत्रितयत्वं नैव गृह्यते, अन्यथा महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वा तादृशत्रितयत्वं न वर्तते इति सिध्येत् । तथा च धर्मविधया तादृशत्रितयत्वेनैवाऽवच्छिन्ना सा तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना स्यादेव ।

य शो ला ता

तादृशत्रितयत्वम् अवच्छेदकतात्वन्यूनवृत्ति, अवच्छेदकतात्वस्य सर्वासु अवच्छेदकतासु वर्तमानत्वात्, तादृशत्रितयत्वस्य च तार्णत्वनिष्ठप्रतियोगितावच्छेदकतायां महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्चैव वर्तमानत्वात् । तथा च तादृशत्रितयत्वेन धर्मविधयाऽवच्छिन्ना सा तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्ना स्यादेव । ततश्च तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगितायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्याऽपि धर्मविधया अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वस्यापि च सत्त्वात् तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । ततश्च तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमेव लभ्यते इति धर्मविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं स्यादेव ।

ततश्च तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः सम्भवात् पूर्वोक्तरीत्या धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्मविधया यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । ततश्च

य शो ल ता

तार्णमहानसीयवह्न्यभावोऽपि धर्तुं शक्यते । तार्णमहानसीयवह्न्यभावाधिकरणविधया 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं प्राप्यते एव, तत्र तार्णमहानसीयवह्न्यभावस्याऽविषयत्वात्, तत्र च तज्ज्ञानत्वहेतोः वृत्तितया स्यादेव अव्याप्तिः । अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्व-परिष्कारघटितलक्षणेऽपि अव्याप्तिसत्त्वे अवच्छेदकतात्वातिरिक्तावच्छिन्नत्वपरिष्कारघटितलक्षणे तु सुतरामव्याप्तिः स्यादेव ।

इत्थञ्च अवच्छेदकतात्वातिरिक्तधर्मावच्छिन्नत्वं प्रवेश्यताम् अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वं प्रवेश्यतां वा, अव्याप्तिः न जातु तथापि भवत्पार्श्वं मुमुक्षति इति अशरणाः भवन्तः त्यजन्तु एतल्लक्षणमित्येव विनम्रं विनिवेद्यते विदुषां भवता***मिति चेत् ?***

अत्रोच्यते, अयुक्तमुक्तं भवता, साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वलक्षणलघुभूतपरिष्कारेणैव तन्निवारणसम्भवात् । तथा चैवं लक्षणम् - साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति, यद्वा साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभाव इति ।

एतल्लक्षणानुसारेण नास्ति कुत्रापि आपत्तिः । तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेन अवच्छिन्ना, अवच्छेदकतात्वं वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते इति साध्यतावच्छेदकतावृत्ति कथ्यते, किन्तु साध्यतावच्छेदकतापर्याप्तं न कथ्यते, यावदवच्छेदकतासु तस्य पर्याप्तत्वात्, न केवलप्रकृतसाध्यतावच्छेदकतायामिति साध्यतावच्छेदकतापर्याप्तधर्मविधया अवच्छेदकतात्वं न गृह्यते । ततश्च धर्मविधया केवलावच्छेदकतात्वेनैव साध्यतावच्छेदकताऽपर्याप्तेनावच्छिन्ना सा अवच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना नैव स्यात् । साध्यतावच्छेदकतात्वेनाऽवच्छिन्ना तद्व्यक्तित्वेन वा अवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता

(साध्यतावच्छेदकतात्वावच्छिन्नतया सर्वासां प्रकृतसाध्यतावच्छेदकतानां ग्रहणसम्भवात्), साध्यतावच्छेदकतात्वस्य साध्यतावच्छेदकतायां पर्याप्तत्वात्, साध्यतावच्छेदकतापर्याप्तधर्मेण अवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । तथा च साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवेत्, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः ।

एवं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिताऽपि साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितायाः तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयत्वेनाऽवच्छिन्नत्वात्, तादृशोभयत्वञ्च न प्रकृतसाध्यतावच्छेदकतायां पर्याप्तम्, महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि तस्य वर्तमानत्वात् । तथा च तदवच्छिन्ना हि सा महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते । किन्तु पूर्वोक्तरीत्या साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता एव साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते इति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत्, न महानसीयत्व-वह्नित्वगतद्वित्वम् ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितारूपा भवेत्, न महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता इति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते

इति वह्न्यभावः एव ग्राह्यः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते । तादृशावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनावच्छिन्ना भवति, अवच्छेदकतात्वञ्च सर्वासु अवच्छेदकतासु पर्याप्तम्, न साध्यतावच्छेदकतायामिति तादृशसाध्यतावच्छेदकतापर्याप्तधर्मविधया अवच्छेदकतात्वं न गृह्यते इति अवच्छेदकतात्वावच्छिन्ना सा अवच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना नैव भवेत् ।

एवं तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयत्वेनैवाऽवच्छिन्ना भवेत्, तादृशत्रितयत्वातिरिक्तेन न केनाऽपि, तादृशत्रितयत्वञ्च न साध्यतावच्छेदकतायामेव पर्याप्तम्, साध्यतावच्छेदकताऽतिरिक्ते तार्णत्वनिष्ठप्रतियोगितावच्छेदकत्वेऽपि वर्तमानत्वात् । तथा च तादृशत्रितयत्वावच्छिन्ना तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकतावह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिताऽपि साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना नैव भवेत् । किन्तु साध्यत्वावच्छेदकतात्वोभयावच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना भवेत्, साध्यत्वावच्छेदकतात्वोभयस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन्नेव पर्याप्तत्वात् । ततश्च साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठ-वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तितार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगिता वा न गृह्यते, किन्तु साध्यतावच्छेदकतानिष्ठसाध्यतावच्छेदकतापर्याप्तसाध्यत्वावच्छेदकतात्वोभयावच्छिन्नमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव गृह्यते इति

साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, न वह्नित्वगतैकत्वम्, न वा तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वम् ।

ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाञ्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नाऽनुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वात्, साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितानवच्छेदकेनवह्नित्वगतैकत्वेन तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वेन चावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यैव सत्त्वात्, साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव सत्त्वाच्च साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वा धर्तुं न शक्यते इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः, न वा तार्णमहानसीयवह्न्यभावः इति महानसीयवह्न्यभावाधिकरणे तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिरिति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वप्रवेशे नास्त्येव काऽप्यापत्तिः ।

एवं यदि यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं निवेशितं वर्तते, ततश्च

साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकता-निरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपगन्तव्यं स्यात्, तदा अव्याप्तिः स्यादेव । तथा हि -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवति इति निश्चितम्, तत्र महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तिसम्बन्धेन वर्तमानावच्छेदकतादौ एव भवेत् । तत्र महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता पर्याप्तिसम्बन्धावच्छिन्ना । ततश्च महानसीयत्वनिष्ठसाध्यतावच्छेदकतावह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयं महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तं भवेत् । अतः महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्मिन् वर्तमाना स्यादेव । तादृश महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयत्वेनैवाऽवच्छिन्ना, तादृशोभयत्वञ्च वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तते एवेति वह्न्यभावीययत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया तादृशोभयत्वं नैव गृह्यते । ततश्च तादृशोभयत्वातिरिक्तेन अनवच्छिन्ना महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयाऽपि वर्तते, यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नापि वर्तते ।

ततश्च साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । तादृशप्रतियोगिताश्रयावच्छेदकता-विधया वह्नित्वनिष्ठ-प्रतियोगितावच्छेदकता लभ्यते एव, तादृशप्रतियोगितावच्छेदकतानिरूपित-

प्रतियोगितानिरूपकाभावः = वह्न्यभावः इति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगिता-वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगिता-वच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावविधया वह्न्यभावः धर्तुं शक्यते एव, वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रति-योगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं निवेश्य 'साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावा-धिकरण-निरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीक्रियते तदा नोक्ताऽव्याप्तिः, यतः साध्यतावच्छे-दकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र महानसीयत्व-वह्नित्वगत-द्वित्वमेव भवति पूर्वोक्तरीत्या, तादृशमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगिता च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतो-भयस्मिन् वर्तमाना भवेत्, किन्तु तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतोभयस्मिन् वर्तमाना तादृशप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकत्वेनाऽनिरूपिता नैव भवेत्, यतः तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभय-वृत्तिप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयत्वेन प्रतियोगिताऽवच्छेदकतात्वोभयातिरिक्तेनैवाऽवच्छिन्ना इति तादृशप्रतियोगितायां निरूपितत्वसम्बन्धा-वच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नतादृशोभयत्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं स्यादेवेति तादृशप्रतियोगितायां निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं नैव स्यात् । अत एव साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगद्वित्वरूपावच्छिन्नानुयोगिता-

निरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं न शक्यते ।

किन्तु पूर्वोक्तरीत्या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता एव साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्तुं शक्यते, तादृशप्रतियोगितायाः प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वात्, प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्तधर्मेणाऽनवच्छिन्नत्वाच्च तादृशप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य सत्त्वात् । ततश्च महानसीयवह्न्यभावाधिकरणे तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्यव्याप्तिः ।

किन्तु यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वप्रवेशे तु उक्तरीत्याऽस्त्येवाऽऽपत्तिरिति तन्निवारणाय यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्थाने प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वं निवेश्य 'साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रकृताऽभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लघुभूतं लक्षणमभ्युपगन्तव्यम्, ततश्च 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् इत्यत्र पूर्वोक्तरीत्या अव्याप्तिः नैव स्यात्, यतः साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकतावह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगितायां सम्भवति, किन्तु तादृशप्रतियोगितायाः महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयत्वेनैवाऽवच्छिन्नत्वात्, तादृशोभयत्वस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तमानत्वेन प्रकृतवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तत्वाऽसम्भवाच्च तादृशोभयत्वावच्छिन्ना सा महानसीयत्वनिष्ठ-

य शो ल ता

साध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता प्रकृतवह्न्यभावीय-प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्ना नैव भवेत् । तथा च साध्यतावच्छेदकतापर्याप्तधर्मा-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीय-प्रकृताऽभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं नैव शक्यते ।

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वावच्छेदकतात्वो-भयेनैवाऽवच्छिन्ना, प्रतियोगित्वावच्छेदकतात्वोभयञ्च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, एतदतिरिक्तेषु न कुत्रापि वर्तते इति प्रकृतमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तं स्यादेव । ततश्च प्रतियोगितावच्छेद-कतापर्याप्तप्रतियोगितावच्छेदकतात्वोभयावच्छिन्ना हि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगिता प्रकृताभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्ना स्यादेव, तादृशमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां पूर्वोक्तरीत्या साध्यतावच्छेदकतापर्याप्तधर्मा-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीयत्वं तु वर्तते एवेति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रकृताऽभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एवेति महानसीयवह्न्यभावः प्रकृते गृह्यते, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिरिति सर्वमु-पपन्नम् ।

●●●

।। વિભાગવાર પૃષ્ઠ સૂચિ ।।

(ચૌદ વિભાગોમાં કયા વિભાગમાં કેટલા પૃષ્ઠો અને કેટલી દીધિતિઓ સમાવેશ પામી છે તેની સૂચિ અહીં પ્રસ્તુત કરાઈ છે.)

વિભાગ	દીધિતિ	પૃષ્ઠ
વિભાગ - ૧	૧ + ૨	૩૧૨
વિભાગ - ૨	૩	૬૪૪
વિભાગ - ૩	૪	૧૦૮૮
વિભાગ - ૪	૫	૧૩૯૬
વિભાગ - ૫	૫	૧૭૬૬
વિભાગ - ૬	૫	૨૦૯૪
વિભાગ - ૭	૫	૨૪૩૬
વિભાગ - ૮	૫	૨૭૮૨
વિભાગ - ૯	૫ + ૬	૩૧૦૨
વિભાગ - ૧૦	૬	૩૪૧૦
વિભાગ - ૧૧	૭	૩૭૪૬
વિભાગ - ૧૨	૭	૪૦૨૦
વિભાગ - ૧૩	૭ + ૮	૪૨૮૮
વિભાગ - ૧૪	૯ તથા પરિશિષ્ટ	૪૪૨૪ + પરિશિષ્ટ

ઊડાનની પરિસીમા
'GSLV' છે,
ઊંચાઈની પરિસીમા
'એવરેસ્ટ' છે,
ઊંડાઈની પરિસીમા
'પેસેફિક' છે,
તેમ વ્યાપ્તિના વિશ્વમાં
તર્કની ઊડાનની....
તર્કની ઊંચાઈની....
તર્કની ઊંડાઈની.....
પરિસીમા છે :

"गूढार्थतत्त्वालोक"

- प्रकाशक -
श्री दिव्यदर्शन ट्रस्ट

9 789382 019671

MULTY GRAPHICS
(022) 23873222 23884222